एवं तर्हि साधुर्नाम कः ? को नाम असाधुः ? साध्वसाधुशब्दयोः को भेदः ? किमर्थं साधव एव प्रयोक्तव्याः ? इत्यादयः प्रश्नाः समुत्पद्यन्ते । विषयेऽस्मिन् एवमस्ति भगवतो भर्तृहरेर्व्याहारः-

शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् ।
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः ॥ [वाक्य, १-२७]

शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥ [वाक्य, १-१४७]

कृतविद्येभ्यश्च अविच्छिन्नपरम्पराप्रवर्तितशास्त्राच्च निष्पन्नाः शब्दाः साधवः । अभ्युदयनिःश्रेयसहेतव एते । यथा- सास्नादिमति प्राणिनि (गवि) 'गौः' इति शब्दः प्रयुज्यते । गौरिति प्रयोक्तव्ये यदि 'गोणी' इति प्रयुज्यते तर्हि स अपशब्द इति कथ्यते । गवार्थे एव तस्य असाधुत्वं, न तु शणसूत्रनिर्मिते स्यूतविशेषे ।

ननु "भूयांसो अपशब्दाः अल्पीयांसः शब्दाः" इति महाभाष्योक्तदिशा गावी, गोणी, गोता, गोपोतलिका इत्यादयोऽसाधुशब्दा एव लोकव्यवहारे बाहुल्येन प्रयुज्यन्ते । अत एषामपि संस्कारः करणीयो व्याकरणेन इति केषाञ्चन आग्रहः । आग्रहममुम् एवमुक्त्वा परिजहार पदमञ्जरीकारो आचार्य हरदत्तः- "नैते सर्वलोकविदिताः, प्रतिदेशं भिन्नत्वात् अपशब्दानाम् । लोकशब्दश्चायं सर्वलोके वर्तते, सङ्कोचे प्रमाणाभावत्" इति । अत एव 'साधुशब्देनैव अर्थो बोधनीयो नापशब्दैः' इति वर्तते व्याकरणशास्त्रमर्यादा । न केवलम् अर्थप्रत्यायनं शब्दप्रयोगस्य प्रयोजनम्, अपि तु अभ्युदयहेतुत्वमपि तत्रास्ति । विषयोऽयं स्पष्टं प्रावाचि भगवता महाभाष्यकारेण पतञ्जलिना- "समानायामर्थावगतौ शब्देनापशब्देन च (शास्त्रेण) धर्मनियमः क्रियते, शब्देनैवार्थो अभिधेयो नापशब्देन । एवं क्रियमाणम् अभ्युदयकारि भवति" इति । विषयेऽस्मिन् वाक्यपदीयकारोऽपि एवमभिप्रैति- "वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः" इति (साधूनां) साधुभिस्तस्माद्वाच्यमभ्युदयार्थिनाम्" इति

च । [वाक्य, १-१३९] । को वा जनो नापेक्षते अभ्युदयं लोके ? अतः कारणात् साधु- शब्दप्रयोगः प्रशस्यते । साध्वसाधुविवेकाय व्याकरणं समाश्रयणीयमेव । एवं शब्दशास्त्रस्य प्रासङ्गिकता स्वयमेव सिद्धा भवति ।

साधुशब्दः कः ? असाधुशब्दः कः इति संशये शब्दशास्त्रं वक्ति- अयं साधुरयमसाधुरिति । अत्र केचन एवम् आमनन्ति- "व्याकरणं साधुशब्दान् सृजति । अतो वैयाकरणा नूतान् शब्दान् स्रष्टुमपि समर्थाः" इति । भाष्योक्तिमिमां यद्यवलोकयामस्तर्हि पूर्वोक्तस्य समाधानं लभ्यते । "घटेन कार्यं करिष्यन् यथा कुम्भकारकुलं गत्वा कश्चिदाह- कुरु घटं, कार्यमनेन करिष्यामीति, न तद्वत् शब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वा आह- कुरु शब्दान् प्रयोक्ष्ये इति" । [व्या. म. भा. पश्पशाह्निकम्]

व्याकरणं समुत्पन्नायाः भाषायाः रक्षणं करोति, न तु नूतनान् शब्दान् समुत्पादयति । भाषा विकृतिं न प्राप्नुयात् इत्युद्देशेन भाषायाः रक्षणार्थं प्रवर्तते शब्दशास्त्रम् । पदे वाक्ये वा संशये समुत्पन्ने सन्देहस्य निवारणं कृत्वा साधुत्वज्ञानं समुत्पाद्य अस्मान् उपकरोति । व्याकरणज्ञानबलेनैव 'इयं प्रकृतिः, अयं प्रत्ययः' इति शब्दशरीरम् अवगतं भवति । यद्यपि 'शिष्टप्रयुक्तत्वे सति व्याकरणसंस्कृतत्वं साधुत्वम्' इति साधुत्वनिर्वचनं क्रियते । तथापि वैदिकलौकिकशब्दानां साधुत्वनिर्णयप्रकारस्तु अनेकविधः इति साधुत्वचिन्तनेन ज्ञातो भवति ।

तद्यथा-

१. छान्दसत्वात् २. आर्षत्वात् ३. शिष्टप्रयोगात् ४. व्याकरणसंस्कृतत्वात् ५. महाकविप्रयोगात् साधुत्वम् ।

साधुत्वप्रकाराः

१. छान्दसत्वात् साधुत्वम्-

अस्माकं सनातनसंस्कृतेः प्रतिनिधिभूताः परब्रह्मणो निश्श्वासभूताः वेदास्तावत् परमप्रमाणत्वेन स्वीकृताः भारतीयसनातनपरम्परानुयायिभिः । अस्माकं शास्त्रसौधानां परमाधारभूताः शिला एव वेदाः ।



अध्यात्मज्ञानधाराया मूलस्रोतांसि एते । एतादृशानां वैदिकशब्दानां साधुत्वविषये न किमपि चिन्तनं क्रियते कैरपि, अपौरुषेयत्वात् तेषाम् ।

पुरुषकृतेषु खलु दोषाविष्करणबुद्धिर्जागर्ति दोषज्ञानाम् ? प्रायः सदोषाः खलु पुरुषप्रयासाः ? अतः कारणात् वैदिकाः शब्दा वैदिकत्वादेव साधवः । वेदानां विषये अस्माकं भारतीयानां परमश्रद्धायाः आदरातिशयस्य भक्तेः पराकाष्ठायाश्च द्योतकोऽयं साधुत्वनिर्णयः ।

२. आर्षत्वात् साधुत्वम्-

वाल्मीकि-व्यासप्रभृतीनां कृतिष्वपि तत्र तत्र अपाणिनीयप्रयोगाः दृश्यन्ते । तेषां कथं साधुत्वमिति चेत्- 'आर्षत्वात्' इत्युत्तरम् । वाल्मीकि व्यासादयः प्रत्यक्षधर्माणः, परापरज्ञाः, विदितवेदितव्या, अधिगतयाथातथ्या ऋषिवराः । तत्रभवतां प्रयोगविषये भारतीयसनातनसंस्कृत्यभिमानिभिः कैः वैयाकरणमूर्धन्यैर्दोषाविष्करणं क्रियेत ? एभिर्मुनिपुङ्गवैः प्रयुक्तानां शब्दानां साधुत्वं सश्रद्धं, सभक्ति, सगौरवम् अभ्युपगतं शाब्दिकैः ।

३. शिष्टप्रयोगात् साधुत्वम्-

साधुत्वनिर्णये तृतीयः प्रकारोऽयं शिष्टप्रयोगः । महाभाष्यादिग्रन्थेषु तत्र तत्र असकृत् दृष्टिपथमधिरोहति 'शिष्टप्रयोगात् एषां साधुत्वम्' इति वाक्यम् । शिष्टानां प्रयोगोऽपि साधुत्वनिश्चये प्रमाणं भवति इति ज्ञायते अनेन । एवं तर्हि के ते शिष्टाः इति प्रश्नः समुदेति । प्रश्नस्यास्य समाधानं पातञ्जले महाभाष्ये इत्थं प्रदत्तमस्ति- "एतस्मिन् आर्यावर्ते आर्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतास्तत्र- भवन्तः शिष्टाः" इति । अर्थात् ये प्रतिदिनं जीविकायै सङ्गृहीत- कुम्भपरिमितधान्याः, दम्भादिरहिताः, दृष्टं लाभपूजादिकारणमन्तरेणैव विहित- बुद्ध्या सदाचारानुवर्तिनः, विनैव गुरूपदेशाभ्यासादिभिः स्वतपोबलादेव शब्दतोऽर्थतश्च प्रतिभातसर्वविद्याः सन्ति ते शिष्टाः । ईदृशानां शिष्टजनानां प्रयोगोऽपि साधुत्वं भजते ।

४. व्याकरणसंस्कृतत्वात् साधुत्वम्-

शब्दानां साधुत्वनिर्णयः प्राधान्येन शब्दशास्त्रमाश्रित्यैव भवति ।

वेत्यादयो विचाराः सविस्तरं निरूपिताः । एवञ्च साधुत्वाध्वनि जिगमिषुभिरवश्यं शब्दशास्त्रं समाश्रयणीयमित्यत्र नास्ति संशयलेशः । पूर्वोक्ताः सर्वे विषयाः स्पष्टं प्रतिपादयन्ति व्याकरणस्य महत्तां प्रासङ्गिकताञ्च ।

इति शम्

## अवलोकितग्रन्थाः


१. योगसूत्रम्– पतञ्जलिविरचितम् ।
२. वाक्यपदीयम्– भर्तृहरिप्रणीतम् ।
३. वाक्यपदीयम्– भर्तृहरिरचितम् । ब्रह्मकाण्डम्,
   कन्नडानुवादः– म.म. विद्वान् रङ्गनाथशर्मा ।
४. व्याकरणमहाभाष्यम्– पतञ्जलिकृतम् । प्रदीपोद्योतछायाटीकासहितम् ।
५. काशिका– पदमञ्जरीसहिता, वामनजयादित्यविरचिता ।
६. अष्टाध्यायी– पाणिनिप्रणीता ।
७. वैयाकरणसिद्धान्तकौमुदी– भट्टोजिदीक्षितरचिता ।



डा. विद्वान् उदयभट्टः,
सहायकप्राध्यापकः,
व्याकरणशास्त्रविभागः,
महाराजसंस्कृतमहाविद्यालयः,
मैसूरु–570004, कर्नाटक
चरदूरवाणी–9448675994,
7829671090


********



महाभाष्यकारोऽप्याह–

"प्रयुक्तानामिदमन्वाख्यानम्" इति ।

आशयममुं स्वीचकार वार्तिककारो वररुचिः–

"सिद्धे शब्दार्थसम्बन्धे" इति वार्तिकेन [व्या. म. भा. पश्पशाह्निकम्] ।

लोके शब्दोऽपि सिद्धः, अर्थोऽपि सिद्धः, तयोः सम्बन्धोऽपि सिद्धः । एतादृशं सिद्धं शब्दं संस्करोति व्याकरणम् ।

अत्र कैश्चित् एवमारोप्यते– व्याकरणनियमैः संस्कृतभाषा रज्ज्वा गौरिव बद्धा । अत इयं भाषा अभिवृद्धिं न गता, गच्छति गन्ता वेति । अत्र विचारणीयोंऽशोऽयमस्ति– किमर्थम् अस्माकं प्राचीनमहर्षिभिर्नियमाः कृताः? तेषां नियमप्रणयनोद्देशः कः? किं स्वहितरक्षणाय तैर्लक्षणानि प्रणीतानि वा परहितसाधनाय? शब्दसाधुत्वरक्षणायैव नियमप्रणयनं कृतं पाणिन्यादिमुनिभिः । भगवता भर्तृहरिणा एवमभ्यधायि–

नानर्थिकामिमां कश्चित् व्यवस्थां कर्तुमर्हति ।
तस्मान्निबध्यते शिष्टैः साधुत्वविषया स्मृतिः ॥ इति । [वा.प., १–२९]

यः कश्चित् मन्दधीरपि निष्प्रयोजनां साधुत्वविषयिणीं दुर्ज्ञेयां दुरध्येयाम् एतादृशीं महतीं व्यवस्थां कर्तुं नार्हति । "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति वाक्यानुसारेण मन्दस्यापि निष्प्रयोजके कर्मणि प्रवृत्त्यदर्शनेन पाणिन्यादीनां प्रवृत्तेः सुतरामसम्भवात् । परन्तु साधुत्व– विषयकव्यवस्थायां पाणिन्यादीनां महर्षीणां साग्रहं प्रवृत्तिदर्शनात् एतस्याः साधुत्वव्यवस्थायाः सप्रयोजनत्वम् अध्यवसीयते । तस्मात् साधुत्वविषयक– व्यवस्थायाः सप्रयोजनत्वात् पाणिन्यादिभिरनादिगुरुपूर्वक्रमागता व्याकरणस्मृतिः सामान्यविशेषवल्लक्षणेन निबद्धा । अंशोऽयं न कदापि विस्मर्तव्यः । अपि च लोके सन्ति नैके नियमाः । "समाजोऽयं सन्मार्गे प्रवर्तताम्" इत्युद्देशेन नियमा एते विरचिताः । नियमानामेषामनुसरणेन सामाजिकहितरक्षणमेव भवति । उदाहरणार्थम्– मार्गनियमाः । मार्गनियमाः सर्वकारेण कृताः सन्ति । मार्गे सञ्चरतां जनानां जीवरक्षणोद्देशेनैव नियमा इमे विहिताः, न तु तेषां स्वातन्त्र्यहरणाय । यदि सर्वेऽपि वाहनारोहिणो यादृच्छिकं व्यवहारं कुर्युः तर्हि

कति जनाः सकुशलं स्वगृहं प्राप्नुयुः ? कति जनाः मृता न स्युः ? कति जना विकलाङ्गा न भवेयुः ? मार्गनियमैस्तावत् स्वाच्छन्द्यस्य हरणम् अवश्यं भवत्येव, न तु स्वातन्त्र्यस्य हरणम् । कारणादस्मात् नियमानां दूषणं न युक्तम् ।

पाणिनीयव्याकरणस्य महत्त्वम्–

सत्स्वपि नैकेषु व्याकरणेषु संस्कृतवाङ्मयस्य तलस्पर्शिविवेचनेन दार्शनिकांशेन च परिपूर्णमिदं पाणिनीयशब्दानुशासनं विद्वज्जनग्राह्यमभवत् । अष्टभिरध्यायैः समुल्लसितमिदं पाणिनीयव्याकरणं वररुचेर्वार्तिकैरुपबृंहितं पतञ्जलेर्महाभाष्येण प्रतिष्ठापितं सत् 'त्रिमुनिव्याकरणम्' इति प्रसिद्धिमवाप । वेदाङ्गत्वेन परिगणितमिदं व्याकरणम् आसेतुहिमाचलम् अध्ययन–अध्यापन–परम्परायां महत्त्वं स्थानम् आदधाति । व्याकरणस्यास्य वैज्ञानिकमहत्त्वं परिगणय्य वैदेशिका अपि अष्टाध्याय्याः अध्ययने प्रवृत्ताः सन्ति इत्येतत् समेषां भारतीयानां कृते गौरवस्थानम् ।

प्रकृतिप्रत्ययविवेचनं कुर्वता शब्दशास्त्रेण तत्र का प्रकृतिः ? कः प्रत्ययः ? तयोः कोऽर्थः ? प्रकृत्यर्थप्रत्ययार्थयोः कस्य प्राधान्यम् ? वाक्यांशे कः सुबन्तः ? तिङन्तश्च कः ? तयोः कथम् अन्वयः ? कश्च वाक्यार्थः ? शब्दस्यार्थबोधे का शक्तिरङ्गीकृता ? तच्छक्तिस्वरूपं कीदृशम् ? शब्दो नित्य उत अनित्यः ? नित्यत्वे किं मानम् ? शब्दार्थयोः सम्बन्धः सिद्ध आहोस्वित् असिद्धः ? इत्यादयः सर्वेऽपि विषयाः विमृष्टाः । ईदृशीभिर्बहु–विचारधाराभिः परिपूर्णमिदं मनसः क्लेशाधायकं शब्दशास्त्रं किमर्थम् अध्येयम् इति विचारो महाभाष्यकारस्य पतञ्जलेः पुरतः समापतित आसीत् । व्याकरणमहाभाष्ये विषयममुं प्रास्तावीत् भगवान् पतञ्जलिः । तत्र तावत्– "वेदमधीत्य त्वरिता वक्तारो भवन्ति, वेदान्नो वैदिकाः शब्दाः सिद्धाः लोकाच्च लौकिकाः । अनर्थकं व्याकरणम् इति । तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद् भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे । इमानि प्रयोजनानि, अध्येयं व्याकरणम्" इत्यस्ति । [व्या.म.भा.पस्पशाह्निकम्] । वेदाध्ययनमात्रेण स्वशिक्षणस्य परिसमाप्तिं कामयमानान् छात्रान् दृष्ट्वा दुःखित आचार्यः स्नेहभावेन व्याकरणस्य महत्ताम् आवश्यकताञ्च निरूपयन्–सन्ति प्रयोजनानीमानि ।



अतो व्याकरणमवश्यमध्येयमित्याह । तत्र "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इत्यनेन व्याकरणाध्ययनस्य रक्षोहलघ्वसन्देहरूपाणि चत्वारि मुख्यप्रयोजनानि न्यरूपि भगवता महाभाष्यकारेण । व्याकरणाध्ययनस्य वेदरक्षणं मुख्यं प्रयोजनम् । तथा वेदार्थज्ञानरक्षणमपि तस्य अवान्तरप्रयो–जनम् । शिष्याचार्य सम्बन्ध एव महान् वेदरक्षाहेतुः, किं व्याकरणेन इति पक्षोऽप्यस्ति । किन्तु लौकिकभाषाप्रयोगे लोपादिरहितं अदुहत, उदग्राहम्, निग्राहम्, गृह्णामि इत्यादीन् शब्दान् मनसि दृढं परिकल्प्य वेदे देवा अदुह, उदग्राभं च निग्राभञ्च इत्यादीन् दृष्ट्वा लोकप्रयुक्तान् पूर्वोक्तशब्दान् अदृष्ट्वा अवैयाकरणो भ्राम्येत् । आचार्यवचनात् भ्रमनिवृत्तिर्भवतीति यद्यपि वक्तुं शक्यते, किन्तु असाधुत्वभ्रमशङ्कया आचार्यवचनेष्वपि अविश्वास एव स्यात् ।

वस्तुतस्तु व्याकरणज्ञानाभावेऽपि वेदे पदक्रमजटादीनां लक्षणभिन्नानां ख्यापकानां सत्वेन न भ्रमत्वसम्भवः । परन्तु पदक्रमादिविषयेऽपि भ्रमशङ्कायां व्याकरणमेव अर्थात् तज्ज्ञानमेव निर्णयस्थानमिति कृत्वा पदादयो व्याकरण–लक्ष्या एव भवन्ति । तथा च पदादिषु व्याकरणेन भ्रंशाभावः, शुद्धैः पदैश्च वेदे भ्रंशाभाव इति तात्पर्यम् । अवैयाकरणस्तु पदादिषु भ्रान्तो वेदेऽपि भ्राम्येदिति भावः । वैयाकरणस्तु न भ्रमति, वेदार्थं सम्यग्विजानाति ।

एवञ्च वेदार्थज्ञानपूर्वकं शुद्धतत्त न्मन्त्रैस्तद्विहितकर्मानुष्ठानेन स्वर्गसुखम्, उपनिषदर्थज्ञानेन तदुक्तदिशा आचरणेन च मोक्षश्चेति व्याकरणं पुरुषार्थसाधनमपि भवतीति ज्ञायते । ननु प्रतिशाखं विद्यमानवैदिकव्याकरणानां प्रातिशाख्यापरनाम्नां ग्रन्थानाम् अध्ययनेन भ्रमशङ्कैव नोदेति इति केषाञ्चन मतम् । किन्तु तेषां प्रातिशाख्यानां अनन्तासु वेदशाखासु क्वचित् क्वचित् विनाशदर्शनात् अमीषाम् अध्ययनमपि प्रतिशाखं दुर्लभम् । अतो व्याकरणमेव शरणीकरणीयम् ।

एवञ्च वेदरक्षैव व्याकरणस्य मुख्यं प्रयोजनमिति प्रतिपादयता भाष्यकृता मन्त्रेषु ऊहः कथं कर्तव्यः? तत्र व्याकरणं कथमुपकरोति? साधुशब्दानां ज्ञानं लाघवेन भवितुं शब्दशास्त्रं कथं सहकारि भवति? मन्त्रेषु विद्यमानान् स्वरान् दृष्ट्वा अर्थनिर्धारणं कर्तुं व्याकरणसहायेन शक्यते

ददाति इत्यर्थः । एवं भगवान् चक्षुरादीन्द्रियनियामकः इति सिद्ध्यति । एवञ्च माण्डूकोपनिषदि 'स्वप्नस्थानोऽन्तःप्रज्ञः' इति उक्तम् । अस्य भाष्ये एवमुच्यते –

जाग्रद्दर्शनसंस्काररूपत्वात् स्वप्नगं तु यत् ।
प्रविविक्तं तु तज्ज्ञानकारणोऽन्तर्ज्ञ उच्यते ॥

प्रविविक्तं नाम स्वाप्नवस्तु । स्वाप्नपदार्थज्ञानकारणं भवति भगवान् । अतः तस्य अन्तर्ज्ञः अन्तःप्रज्ञः इति नाम । अत्र स्वप्ननि- यामकत्वमुक्तम् । स्वप्नकाले चक्षुरादीन्द्रियाणि स्वकार्याणि न कुर्वन्ति । किन्तु मनसि विद्यमानसंस्कारः स्वप्नरूपेण भवति । तस्य कारणं भगवान् इति उक्तत्वात् भगवान् मनोनियामकः इति सिद्ध्यति । इति चक्षुरादीन्द्रियनियामकत्वविचारे तथा मनोनियामकत्वविचारे संवादो दृष्टः ।

एवं केनोपनिषदुक्तविचाराणां संवादो दृष्टः माण्डूकोपनिषदि ।

### माण्डूकोपनिषदि काठकोपनिषदुक्तसंवाददर्शनम्

प्रायः सर्वा अपि उपनिषत् यमनचिकेतसोः संवादरूपेण विद्यते । मुक्तनियामकभगवत्स्वरूपविचारः विशेषतः प्रस्तुतः काठकोपनिषदि । काठकोपनिषदि कश्चन मन्त्रः एवं श्रूयते –

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ॥
ओमित्येतत् ॥

यस्य भगवतः स्वरूपं सर्वे वेदा वदन्ति, यस्य प्रीत्यर्थं सर्वाण्यपि तपांसि विद्यन्ते, यस्य प्राप्त्यर्थं साधकाः ब्रह्मचर्यं चरन्ति तस्य स्वरूपं सङ्ग्रहेण वदामि । तत् ओम् इति कथ्यते । भगवान् ओङ्कारवाच्यः इत्यभिप्रायः । माण्डूकोपनिषदि 'सर्वमोङ्कार एव' इति उक्तम् ।
अस्यार्थः भाष्ये एवमुक्तः –

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XIV : July to December – 2019

# माण्डूकोपनिषदि इतरोपनिषदुक्तविचारसंवाददर्शनम्

महेन्द्रः सोमयाजी (तिरुपतिः)*

माण्डूकोपनिषत् अथर्ववेदसम्बन्धिनी । अस्याः उपनिषदः अद्वैत-भाष्यं विशिष्टाद्वैतभाष्यं, द्वैतभाष्यं च विद्यते । अद्वैतभाष्यं द्वैत-भाष्यञ्च साक्षात् मतप्रवर्तकैरेव कृतम् । किन्तु विशिष्टाद्वैतभाष्यं तच्छिष्यपरम्परागतपुरुषकृतम् । अत्र द्वैतवेदान्तपरत्वेन श्रीमदानान्दतीर्थैः येऽर्थाः उक्ताः तेऽर्थाः अन्यत्र उपनिषदि संवादरूपेण यत्र यत्र विद्यन्ते तेषां सङ्ग्रहः सङ्क्षेपरूपेण क्रियते ।

### माण्डूकोपनिषदि ईशावास्योपनिषदुक्तविचारसंवाददर्शनम्

'ईशावास्यम्' इति आरभ्यते इति हेतोः अस्याः उपनिषदः ईशावास्योपनिषदिति नाम । 'याज्ञीयमन्त्रोपनिषत्' इत्यपि अस्याः नाम विद्यते । अस्यामुपनिषदि 'ईशावास्यमिदं सर्वम्' इति उक्तम् । जगत् ईशस्य आवासयोग्यम् । अतः तत् ईशावास्यम् । ईशः किमर्थं जगति वसति इति प्रश्नस्य समाधानं ब्रह्माण्डपुराणे उक्तम् ।

स्वतःप्रवृत्त्यशक्यत्वात् ईशावास्यमिदं जगत् ।

जगत्पदेन जडानि जीवाश्च विवक्षिताः । जगति स्वतः प्रवृत्ति-र्नास्ति । अतः तन्नियमनाय भगवान् जगति प्रविष्टो विद्यते । अतः जगत् ईशावास्यम् । माण्डूकोपनिषदि अस्य विचारस्य संवादो विद्यते । तत्र 'एषोऽन्तर्यामी' इति वाक्यं श्रूयते । भगवान् अन्तर्यामी भूत्वा जगत् नियमयति इत्यर्थः । एवं भगवतः अन्तर्यामित्वविचारे संवादो दृष्टः ।

ईशावास्योपनिषदि कश्चित् मन्त्रः एवं विद्यते –

तदेजति तन्नेजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः ॥

अस्यार्थः भाष्ये एवमुक्तः –

ततो बिभेति सर्वोऽपि न बिभेति हरिः स्वयम् ।
सर्वगत्वात् स दूरे च बाह्येऽन्तश्च समीपगः ॥ इति तत्त्वसंहितायाम् ।

भगवतः सकाशात् अशेषजगत् बिभेति । किन्तु भगवतः भयं नास्ति । सर्वत्र सः व्याप्तः । अतः सः दूरे अन्तिके च वर्तते । अत्र भगवतः भयं न विद्यते इति विचारस्य माण्डूकोपनिषदि संवादो विद्यते ।

युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥

अत्र ‘प्रणवो ब्रह्म निर्भयम्’ इत्येषः भागो विचार्यः । अस्यार्थः प्रणववाच्यस्य भगवतो भयं न विद्यते इति । एवं तन्नेजति इत्यस्य संवादो विद्यते माण्डूकोपनिषदि ।

ईशावास्योपनिषदि कश्चन मन्त्रः एवं विद्यते –

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

अस्य भाष्यम् एवं विद्यते –

सर्वगं परमात्मानं सर्वं च परमात्मनि ।
यः पश्येत् स भयाभावान्नात्मानं गोप्तुमिच्छति ॥

भगवान् सर्वत्र विद्यते । अशेषजगत् परमात्मनि आश्रितम् । य एवं जानाति सः भयाभावात् आत्मरक्षणाय न यतते इत्यभिप्रायः । अत्र ‘यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति इत्येतस्य संवादो माण्डूकोपनिषदि विद्यते । माण्डूकोपनिषदि एवमुक्तम् –



ओमित्येतदक्षरमिदं सर्वम् ॥

अक्षरनामकभगवतः ओमिति नाम विद्यते इत्यभिप्रायः । किमर्थं भगवतः ओमिति संज्ञा विद्यते इत्येतस्य समाधानमुच्यते भाष्ये –

ओतमत्र जगद्यस्मादों तस्माद्भगवान् हरिः ॥

जगत् परमात्मनि प्रविष्टम् आश्रितम् । अतः भगवतः ओमिति नाम इत्यर्थः । एवं ईशावास्योपनिषदुक्तस्य संवादो दृश्यते माण्डूकोपनिषदि । एवं ईशावास्योपनिषदुक्तविचाराणां संवादो दृश्यते माण्डूकोपनिषदि ।

माण्डूकोपनिषदि केनोपनिषदुक्तविचारसंवाददर्शनम्

‘ केन’ इति पदेन आरभ्यते इति हेतोः अस्याः उपनिषदः केनोपनिषत् इति नाम । अस्याः तलवकारशाखासम्बन्धित्वात् तलवकारोपनिषत् इत्यपि नाम विद्यते । अस्यामुपनिषदि कश्चन मन्त्रः एवं श्रूयते –

श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥

भगवान् श्रोत्रस्य श्रोत्रम् । अर्थात् श्रोत्ररूपेण श्रोत्रेन्द्रिये स्थित्वा तत् नियमयति । एवमेव मनसः, वाचः, प्राणस्य, चक्षुषः भगवान् नियामकः । एतादृशं भगवन्तं ये जानन्ति ते मुक्ताः भवन्ति इत्यर्थः । एवं भगवान् इन्द्रियनियामकः । इन्द्रियाणि तस्य सान्निध्यात् स्वकार्याणि निर्वहन्ति । जीवस्य इन्द्रियद्वारा विषयभोगः भगवतः अनुग्रहात् भवतीति सिद्ध्यति । माण्डूकोपनिषदि ‘जागरितस्थानो बहिःप्रज्ञः’ इति उक्तम् । अस्य भाष्ये एवमुच्यते –

वैश्वानरो जागरितस्थानगो गजवक्त्रकः ।
निर्माता बाह्यसंवित्तेर्जीवानां तदगोचरः ॥

भगवान् वैश्वानररूपेण जागरितस्थाने स्थित्वा बाह्यविषयज्ञानं

सुषुप्त्यवस्थायां प्राज्ञः जीवाय आनन्दं भोजयति इत्यभिप्रायः । एवं सुषुप्त्यवस्थायां स्वप्नाः न दृश्यन्ते एवञ्च सुखानुभवो भवति इत्यस्मिन् विचारे संवादो दृष्टः । एवं षट्प्रश्नोपनिषदुक्तविचाराणां संवादो दृश्यते माण्डूकोपनिषदि ।

वैदिकशास्त्रसर्वस्वमपि संवादसापेक्षम् । संवादविरहितं वाक्यं श्रद्धायै न भवति । उपनिषदि परस्पसंवादाः बहवो विद्यन्ते । एतैः संवादवचनैः शास्त्रीयविचारेषु दार्ढ्यं भवति ।

महेन्द्रः सोमयाजी,
शोधच्छात्रः
द्वैतवेदान्तविभागः
राष्ट्रीयसंस्कृतविद्यापीठं,
तिरुपतिः- 517507, आन्ध्रप्रदेशः
चरदूरवाणी- 9686325038

*********

***(विद्वान् महेन्द्र सोमयजी बि. आर्. महाभागः तिरुपतिस्थे विराजमानस्य राष्ट्रियसंस्कृतविद्यापीठस्य द्वैतवेदान्तविभागस्य मुख्यस्थानां प्रो. नरसिंहाचार्य पुरोहितः महोदयानां मार्गदर्शनेन "द्वैतवेदान्तपरत्वेन माण्डूकोपनिषदः समीक्षात्मकमध्ययनम्" इत्यस्मिन् विषये तिरुपतौ संशोधनकर्मणि रतः ।)**

******



ओमित्याक्रियते यस्मादोङ्कारोऽसावतः परः ।
सर्वत्वमिति पूर्णत्वं तन्नान्यस्य हरेः क्वचित् ॥

भगवान् ओमिति आक्रियते । अतः तस्य ओङ्कार इति नाम इत्यर्थः । एवं भगवतः ओङ्कारवाच्यत्वविचारे संवादो दृष्टः ।
काठकोपनिषदि कश्चन मन्त्रः एवं श्रूयते –

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् ।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥

अस्मिन् मन्त्रे ब्रह्मणः अक्षरमिति नाम विद्यते इति ज्ञायते । अक्षरं नाम नाशरहितम् । ब्रह्म नाशरहितम् इत्यर्थः । माण्डूकोपनिषदि 'ओमित्येतदक्षरमिदं सर्वम्' इति उक्तम् । अत्रापि भगवतः अक्षरमिति नाम विद्यते इति उक्तम् । अतः अक्षरनामको भगवान् यतः भगवान् नाशरहितः इति विचारे संवादो दृष्टः ।
काठकोपनिषदि कश्चन मन्त्रभागः एवं श्रूयते –

पराञ्चिखानि व्यतृणात् स्वयम्भूः ॥

स्वयम्भूः भगवान् इन्द्रियाणि बहिर्मुखानि यथा भवन्ति तथा सृष्टिं चकार इत्यर्थः । अत्र भगवान् स्वयम्भूशब्देन उक्तः । स्वयं भवतीति स्वयम्भूः । स्वस्य स्वयमेव कारणम् अन्यत् कारणं न विद्यते इत्यर्थः ।
माण्डूकोपनिषदि कश्चन मन्त्रभागः एवं विद्यते –

अपूर्वो ऽनन्तरोऽबाह्योऽनपरं प्रणवोऽव्ययः ॥

अत्र अपूर्वः इति पदं विद्यते । 'अपूर्वः कारणाभावात्' इति भाष्ये अस्यार्थः निरूपितः । एवं भगवतः अन्यत् कारणं नास्ति इत्यस्मिन् विचारे संवादो दृष्टः ।
एवमुच्यते काठकोपनिषदि –
स्वप्नान्तं जागरितान्तं च उभौ येनानुपश्यति ।

महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥

अत्र स्वप्नस्य अन्तः निद्रावस्था अथवा जागृदवस्था । जागरितस्य अन्तः स्वप्नः । एवं जागृदवस्था स्वप्नावस्था सुषुप्त्यवस्था च यस्य भगवतः अनुग्रहात् भवति सः महान्, विभुश्च । तस्य ज्ञानात् धीरः साधकः शोकदूरो भवति । अत्र यदुक्तं भगवान् अवस्थात्रयनियामकः इति तस्य संवादः माण्डूकोपनिषदि अवश्यं विद्यते ।

बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥

भगवान् वैश्वानररूपेण जागृदवस्थानियामको भवति, तैजसरूपेण स्वप्नावस्थानियामको भवति, प्राज्ञरूपेण सुषुप्त्यवस्थानियामको भवति इत्यर्थः । एवम् अवस्थात्रयनियामकत्वविचारे संवादो दृष्टः ।
काठकोपनिषदि एवमुच्यते –

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते । एतद्वै तत् ॥

भगवान् अङ्गुष्ठपरिमितरूपो भूत्वा शरीरस्य मध्यभागे अर्थात् हृदये वर्तते । सः भूतकालस्य भविष्यत्कालस्य च प्रभुः । यः तं जानाति सः आत्मानं गोप्तुं नेच्छति । एतादृशभगवानेव मुक्तनियामकः । अत्र भगवान् हृदये वसति इत्येतस्य संवादो माण्डूकोपनिषदि विद्यते ।

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः ।
आकाशे च हृदि प्राज्ञः त्रिधा देहे व्यवस्थितः ॥

दक्षिणनेत्रस्य अग्रभागे भगवतः वैश्वानररूपं विद्यते । मनसि तैजसस्य सानिध्यं विद्यते । हृदयाकाशे प्राज्ञो विद्यते । एवं भगवान् रूपत्रयेण देहे व्यवस्थितः इत्यर्थः । अत्र हृदये भगवान् प्राज्ञरूपेण विद्यते इति उक्तम् । अतः जीवस्य हृदये भगवान् वर्तते इत्येतस्य संवादो दृष्टः ।
एवं काठकोपनिषदुक्तस्य संवादो दृष्टः माण्डूकोपनिषदि ।



माण्डूकोपनिषदि षट्प्रश्नोपनिषदुक्तविचाराणां संवाददर्शनम्

षट् ऋषयः ब्रह्मतत्त्वविचारे पिप्पलादं पृच्छन्ति । पिप्पलादः समाधानं ददाति । एवं प्रश्नोत्तररूपेण इयम् उपनिषत् विद्यते । षट् ऋषीणां प्रश्नाः तेषां समाधानानि च सङ्गृहणीतानि इति कारणात् अस्याः षट्प्रश्नोपनिषदिति नाम । अस्यामुपनिषदि एवमुच्यते –

अत्रैष देवः स्वप्ने महिमानमनुभवति । यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगन्तरे च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति । जागृदवस्थायां यदनुभूतं तस्य संस्कारो मनसि वर्तते । अतः स्वप्ने तदेव पश्यति, शृणोति च इत्यभिप्रायः ।

माण्डूकोपनिषदि ‘स्वप्नस्थानोऽन्तःप्रज्ञः.........’ इत्यादि उक्तम् । अस्य भाष्ये ‘जागृद्दर्शन.......’ इति उक्तम् । जागृदवस्थायां यदनुभूतं तस्य संस्कार एव स्वाप्नपदार्थरूपेण भवति । तस्य प्रविविक्तमिति नाम । एवं जागृदवस्थायाम् अनुभूतमेव स्वप्नरूपेण भवति इत्यस्मिन् विचारे संवादो दृष्टः ।

षट्प्रश्नोपनिषदि एवमुक्तम् –

स यदा तेजसा अभिभूतो भवत्यत्रैष देवः स्वप्नान् न पश्यति । अथ यदेतस्मिन् शरीरे सुखं भवति । यदा जीवः तेजोनामकभगवता अभिभूतो भवति तदा स्वप्नाः न दृश्यन्ते । सा अवस्था एव सुषुप्तिः । तदा सुखं भवति ।

माण्डूकोपनिषदि एवमुच्यते –

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एव आनन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥ यस्याम् अवस्थायां जीवः यं कमपि कामं कामयते यं कमपि स्वप्नं पश्यति सा अवस्था सुषुप्तिः ।

परन्तु एवं किल आधारयन्ति केचन– यत् अनादेः कालात् निगम–प्रतिद्वन्द्विप्रस्थाननिष्ठैः सौगत–अर्हतादिभिः आगमसम्प्रदायाः समाश्रिताः । कालान्तरेण च निगमसम्प्रदायनिष्ठैः अपि निगमानुगुण्येन सकलप्राणभृतां श्रेयः कामनया आगमसम्प्रदायः सम्प्रवर्तितः ।

ततो हि एषः आगमः वैदिक–अवैदिक भेदात् द्वेधा विभक्तः कृतः । वैदिकानुगुण्येन प्रवर्तिताः आगमाः वैदिका इति परिगणिताः । इतरे तु अवैदिका इति । पुरा तु इदं च आगमपदं शास्त्रमात्रे प्रयुक्तमासीत् इति अवलोक्यते मन्त्रादिभिः । तद्यथा–

प्रत्यक्षमनुमानश्च विभिन्नागमदर्शनैः ।
अनुपासितवृद्धानां विद्या नातिप्रसीददिति ॥ (मनुस्मृतिः, अ.–९२) इति ।
प्रज्ञाविवेकं लभते विभिन्नागमदर्शनैः ।
अनुपासितवृद्धानां विद्या नाति प्रसीददिति ॥ (वाक्यपदीयम्) इति ॥

परन्तु इदानीम् आगमशब्दोऽयं प्रमाणे प्रयुज्यते । कालान्तरेण तन्त्रपदेनापि व्यवह्रियते । निगमः मन्त्रपर्यायः भवति चेत् आगमः तन्त्रपर्यायः संवृत्तः । "मननात् मन्त्रः" तथैव "तननात् तन्त्रः" इति निष्पादयितुं शक्यते । तपः पूतेन मनसा साक्षात् कृतः मन्त्रः । अस्य अर्थस्य विस्तरेण निरूपणात् तन्त्रः प्रवृत्तः । तद्यथा– "सर्वेऽर्थाः येन तन्वन्ते त्रायन्ते च भयाज्जनाः" इति तन्त्रत्त्वं, तन्त्रज्ञाः परिचक्षते इति विष्णुसंहितायाः सप्तमे पटले एवम् उक्तम् अस्ति ।

सर्गः प्रतिसर्गश्च मन्त्रनिर्णय एव च ।
हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम् ॥
राजधर्मो दानधर्मो युगधर्मस्तथैव च ।
व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम् ॥
इत्यादि लक्षणैर्युक्तं तन्त्रमित्यभिधीयते । (वराहतन्त्रम्) इति ॥

एवं वराहतन्त्रेऽपि तन्त्रस्य लक्षणं निरूपितं भवति । तथा आगम–पदाभिधेयानां तन्त्राणामपि चतुर्दशविद्यास्थानेषु आगमपारदर्शिनः आकलयन्ति । आगमवाङ्मये कश्चित् सन्देहावसरः न दृश्यते । यतः संस्कृतवाङ्मये आगमसाहित्यम् अतिमहत्तरं स्थानम् अलङ्करोति ।

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XIV : July to December – 2019

# आगमपदशब्दार्थनिरूपणपूर्वकस्वरूपविवरणम्

–एस्. पि. दयानन्दः (मैसूरु)*

भारतीयसंस्कृतेः आधारभूताः ग्रन्थाः वेदाः, स्मृतयः, इतिहास पुराणानि, आगमाः च । तत्र वेदाः साक्षात् भगवतः सकाशादेव आविर्भूताः । स्मृतयः च भगवता प्रेरितैः ऋषिभिः मनुपराशरादिभिः ग्रथिताः । इतिहास–पुराणानि च भगवतः अभिमतानुरोधेन वाल्मीकिव्यासप्रभृतिभिः समारचिताः । एवम् आगमाः अपि भगवता एव साक्षात् जनानां मोक्षप्राप्तये उपदिष्टाः इति विज्ञायते । एवं भारतीयसंस्कृतेः मूलभूता भाषा संस्कृतभाषा । तस्यां भाषायां उपनिबद्धाः श्रुतिस्मृतिपुराणागमादयः सर्वेऽपि सर्वेषामपि जनानां कृते मोक्षमार्गप्रदर्शनायैव प्रवृत्ताः सन्ति ।

## वेद–आगम–तन्त्रशब्दार्थः

कथितं चैतत् यद् 'विद्–ज्ञाने' इति 'विद' धातुनिष्पन्नस्य 'वेद' शब्दस्य ज्ञानमर्थः इति । एवं गत्यर्थक–'गम्लृ' धातुनिष्पन्नस्य आगम–शब्दस्यापि आगमनमर्थः । अर्थात् 'परम्परया आगतोऽयं आगम' इत्यवगम्यते । किञ्च "ये ये गत्यर्थकाः ते ते ज्ञानार्थकाः" इत्युक्त्या 'आङ्' पूर्वकस्य 'गम्लृ' धातुनिष्पन्नस्य 'आगम' शब्दस्य 'पूर्णज्ञानम्' इत्यर्थो लभ्यते । तथा च आगमः वेदोद्देशमेव साधयतीत्यवगम्यते; यतो वेदोक्तानां मन्त्राणां ऋषि–छन्दो–देवता–पल्लवादिनिरूपणद्वारा मन्त्राणाम् अनुष्ठाने उपयुज्यन्ते आगमाः । वेदोऽपि 'आगम' इति तत्र तत्र प्रयुज्यते 'निगमागम', 'वेदागम' शब्दौ पर्यायभूतौ ।

'तन्त्र' शब्दोऽपि आगमपदस्य पर्यायभूतः । सूक्ष्मतन्त्रे "श्रुतितन्त्रम्" इत्यभिहितम् । "तन्यते– विस्तार्यते, ज्ञानमनेन ज्ञायते च तन्त्रम्" । तन्त्रेण मानवस्य ज्ञानं विकसति; तेन तदुद्धारः इति स्फुटं ज्ञायते । उक्तं च–

तनोति विपुलानर्थान् मन्त्रतन्त्रसमन्वितान् ।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते ॥ इति ॥

अतः मन्त्रतन्त्रसमन्वितार्थनिरूपणद्वारा मानवमुद्धरतीत्यन्वर्थकोऽयं तन्त्रशब्दः ।

वेदागमयोः समप्रामाण्यम्

"आप्नोतिरागमस्सोऽपि" इति पौष्करवचनात्– आगमानामपि वेदवत् आप्तवाक्यत्वं युक्तम् । मनुस्मृतिव्याख्याता कुल्लूकभट्टः "वैदिकी तान्त्रिकी चैव द्विदिधा श्रुतिकल्पना" इति जगाद । तेन वेदागमाः श्रुतित्वेन निर्दिष्टाः । उक्तं च श्रीपतिपण्डितभगवत्पादाचार्येण स्वकीये सूत्रभाष्ये शास्त्रयोनित्वाधिकरणे–

अष्टादशानामेतासां विद्यानां ब्रह्मवर्त्मनाम् ।
आदिकर्ता शिवः साक्षात् शूलपाणिरिति स्थितिः ॥
विमर्शरूपिणी शक्तिः शिवस्य परमात्मनः ।
निगमागमरूपा स्यात् सर्वतत्त्वप्रकाशिनी ॥

श्रीकरभाष्यम्– १.३.३.–पृ–७०

अष्टादशविद्याः

ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्वणवेदः, शिक्षाशास्त्रं, व्याकरणशास्त्रं, छन्दश्शास्त्रं, निरुक्तशास्त्रं, ज्योतिषशास्त्रं, कल्पशास्त्रं, पुराणं, न्यायशास्त्रं, मीमांसाशास्त्रं, धर्मशास्त्र आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रं च एतानि विद्यास्थानानि अष्टादशसङ्ख्याकानि ईश्वरनिर्मितानि इति शास्त्राणाम् अभिप्रायः ।

एवमेव सर्वत्र (श्रीकरभाष्यम्– अ.–१, पा.–२, प्रकृतभ्रं. पु.–१८३–१८४) प्रसिद्ध्यधिकरणेऽपि "किञ्च एककर्तृत्वेन वेदमूलत्वेन कामिकादि शिवागमानां वेदवत् प्रमाणत्वाच्च तदुभयप्रतिपाद्यत्वेन शैवमतं वैदिकमेव ।
तदुक्तं सिद्धान्तशिखामणौ च–

वेदः प्रधानं सर्वेषां साङ्ख्यादीनां महामुने ।
वेदानुसरणादेषां प्रामाण्यमिति निश्चितम् ॥
पाञ्चरात्रस्य साङ्ख्यस्य योगस्य च तथा मुने ।
वेदैकदेशवर्तित्वं शैवं वेदमयं मतम् ॥



वेदैकदेशवर्तिभ्यः साङ्ख्यादिभ्यो महामुने ।
सर्ववेदानुसारित्वात् शैवतन्त्रं विशिष्यते ॥
शैवतन्त्रमिति प्रोक्तं सिद्धान्ताख्यं शिवोदितम् ।
सर्ववेदार्थरूपत्वात् प्रमाणं वेदवत्सदा ॥ इति ॥

भो महामुने साङ्ख्यादीनां सर्वेषां शास्त्राणां वेदः प्रधानम् । वेदानुसरणादेषां प्रामाण्यं निरूपितम् इति । भो महामुने पाञ्चरात्रं, साङ्ख्यं, योगशास्त्रं च वेदैकदेशवर्तित्वं तदर्थं वेदस्य एकभागं अङ्गीक्रियते । भो महामुने वेदस्यैकभागं अङ्गीकृते साङ्ख्यादिशास्त्राणां प्रति सर्ववेदानुसारं शैवसिद्धान्तशास्त्रं सर्वेषां च वैशिष्ट्यं प्रतिपादितम् । शिवेन उपदिष्टं शैवतन्त्रं सिद्धान्ताख्यम् इति प्रोक्तम् । इदं सर्ववेदार्थानां स्वरूपत्वात् इदं सर्वदा वेदं प्रामाण्यं सम्भविष्यति इत्यादिना वेदमूलत्वात् शैवागमानां प्रामाण्यं प्रतिपाद्य वेदोपनिषदुक्तानां मन्त्रानुष्ठानाङ्गन्यासादिनिदर्शकत्वादपि आगमानां प्रामाण्यं निरूपितम् ।

आगमपदस्य अर्थः

कः खलु आगमपदस्य अर्थः इति जिज्ञासायामुच्यते । वैदिकसाहित्ये निगमः आगमश्चेति द्वौ शब्दौ उच्येते । तत्र निगमस्य वेद इति अर्थः लभ्यते । वेदवाक्यानां समुद्धरणसमये "निगमो भवति" इत्यादिना निरुक्ते समुद्धरणं भवति । तस्मिन् निगमे एव वर्तमानानां शब्दानां चतुर्थाध्यायस्य द्वितीयकाण्डे उपदिष्टत्वात् तस्य काण्डस्य नागमत्वम् इति माधवाचार्येण निगमपदस्य अर्थः ऋग्वेदभाष्यभूमिकायां यास्कनिरुक्तग्रन्थस्य प्रयोजनवर्णनावसरे प्रतिपादितम् । "निगमो वेद" इति तत् प्रतिद्वन्द्वितया "आगम" शब्दस्य आविर्भावः । आगम–शब्दस्य लक्षणं शब्दकल्पद्रुमे एवम् उदाहृतम् ।

सृष्टिः प्रलयश्चैव देवतानां यथार्चनम् ।
साधनश्चैव मन्त्राणां पुरश्चरणमेव च ॥
षट् कर्मसाधनश्चैव ध्यानयोगश्चतुर्विधिः ।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधः ॥ (शब्दकल्पद्रुमः)

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XIV : July to December – 2019

# मुण्डकोपनिषदि प्रतिपादितजगत्सृष्टिविषयः

चन्द्रशेखरय्यः (मैसूरु)*

पीठिका–

उप निषीदति इति व्युत्पत्या उपनिषत् नाम वेदानाम् अन्तिमो भागः । इक्षुदण्डे अन्तिमे भागे मूलभागः यथा अधिकरसवान् भवति, तथा वेदभागस्य अन्तिमभागः उपनिषदपि आध्यात्मिकसारसर्वस्वयुक्तोऽस्ति । मोक्षाभिलाषिणां सुलभग्राह्यम् अस्ति । ज्ञानविज्ञाननिधिरस्ति । एतादृश्यः उपनिषदः शताधिकाः सन्ति । तासु दश उपनिषदः प्रमुखाः ।

एतेषां नामानि ईश–केन–कठ–प्रश्न–मुण्डक–माण्डूक्य–ऐतरेय–तैत्तिरीय–छान्दोग्य–बृहदारण्यकम् इति दश उपनिषदः । तासु मुण्डकोपनिषद् अपि अन्यतमा । एषा अथर्ववेदसम्बद्धा अस्ति ।

'मुण्ड' इत्यस्य केशकर्तनम् इत्यर्थः । कर्तितकेशाः सन्न्यासिनः अस्याः अधिकारिणः । अस्यामुपनिषदि निरूपिततत्त्वविद्या अविद्यया आगतानि चित्तचाञ्चल्यभ्रमादीनि मुण्डनकर्मेव कर्तितानि भूत्वा मोक्षरूपविद्या मस्तक–विभूषणं भवति । अतः कारणात् अस्याः मुण्डकोपनिषत् इति नाम औचित्य–पूर्णमस्ति । अस्याः मुण्डकोपनिषदः कृते उमचगी शङ्करशास्त्रिभिः वीरशैव–भाष्यं लिखितवन्तः । अस्मिन् उपनिषदि वीरशैवधर्मस्य अनेकविषयाः वर्तन्ते । अस्मिन् लेखनि जगत् सृष्टिविषयः सङ्क्षेपेण मया एवं निरूपितम् ।

जगत्सृष्टिविषयः

जगत्सृष्टिविषये एषा उपनिषद् महत्त्वयुक्तान्, नानाविचारान् च प्रतिपादितः अस्ति । जगतः महत्त्वं ईशावास्योपनिषदि एवं निरूपितः– "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथाः मा गृध कस्यस्विद्धनम्" । जगदिदं सर्वं दयामयेन ईश्वरेणैव अप्तम् । अणु–रेणु–तृण–काष्ठेष्वपि तस्यास्तित्वमेव निहितम् । तेन भुक्त्वा यत् त्यक्तं तदेव अस्माभिः भोक्तव्यम् ।



आगमशास्त्रस्य अवतरणं, तत् प्रतिपाद्यविषयस्य च उल्लेखनं तन्त्रग्रन्थेषु बहुषः उपलभ्यते ।

लोककल्याणार्थं कलौ युगे भगवता शङ्करेण आगमानाम् उपदेशः कृत इति महानिर्वाणतमे उक्तम् । यथा–

कृते श्रुत्युक्तः आचारः त्रेतायां श्रुतिसम्भवः ।
द्वापरे तु पुराणोक्तः कलावागमसम्भवः ॥ (महानिर्वाणतन्त्रम्)

अपि च–

विना ह्यागममार्गेण कलौ नास्ति गतिः प्रिये ॥ (वराहतन्त्रम्)

"आगच्छन्ति बुद्धिमारोहन्ति यस्मात् अभ्युदयनिःश्रेयसोपायाः सः आगमः । नुगमागमयोः इअयानेव भेदोऽवगम्यते । कर्मज्ञानोपासनस्वरूपं निगमायन्तः निगमाः उच्यन्ते । अभ्युदयादि निःश्रेयसयोः उपायान् बुद्धिपद्धतिम् अवतारयन्तो हि आगमाः परिभाष्यन्ते" (कुलार्णवतन्त्रम्) इति ।

एवं तत्त्ववैशारद्यां वाचस्पतिमिश्रेण आगमशब्दस्य विश्लेषणं कृतम् । आगमः तन्त्रपदेनापि जेगीयते । तन्त्रपदस्य तन्यते विस्तार्यते ज्ञानम् अनेन इति विश्लेषणमपि क्रियते । तद्यथा–

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान् ।
त्राणञ्च कुरुते यस्मात् तन्त्रमित्यभिधीयते ॥

इत्यपि उच्यते । अपि च–

सृष्टिः प्रलयश्चैव देवतानां यथार्चनम् ।
साधनश्चैव मन्त्राणां पुरश्चरणमेव च ॥

उपसंहारः

"किञ्च मुण्डक–माण्डूक्य–छान्दोग्य–बृहदारण्यक–कठवल्यादि सर्वोपनिषत्सिद्धजीवब्रह्मैक्यव्यवस्थापकत्वेन, षडक्षर–त्र्यम्बक–गायत्र्यादि सर्व – मन्त्राणां कराङ्गन्यासादिध्यानविधायकत्वेन गौतम–भारद्वाज–शौनकाद्याचार–विषया कर्षणादिप्रतिष्ठान्तोत्सवादि विधायकत्वेन, "भूत्यै न प्रमदितव्यम्" "अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, भस्मेति भस्म" इत्यादि यजुराथर्वण, बृहज्जाबालकालाभिरुद्रोपनिषदादि

प्रतिपादितविभूति–रुद्राक्षधारणविधायकत्वेन, यजुरारण्यान्तर्गतसद्योजातादिपञ्च – ब्रह्ममन्त्रप्रतिपादकत्वेन, "अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमसि" इति सिद्धवर्षं– पद–मन्त्र–कला–भुवनतत्त्वात्मकषडध्व प्रतिपादकत्वेन, "या ते रुद्र शिवा तनूरघोरापापकाशिनी (तै. सं.–४.५.१.१) "यश्छन्दसां ऋषभो विश्वरूप– श्छन्दोभ्योध्यमृतात् सम्बभूव समेन्द्रो मेधया स्पृणोतु अमृतस्य देवधारणो भूयासम् ॥ शरीरं मे विचर्षणं जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः श्रुतं मे गोपाय ।" (तैत्तिरीय–आरण्यकम्,– ७.४.१) । "सोमो रुद्रा" श्रुतिसिद्धलिङ्गधारणविधायकत्वेन, "अर्चत प्रार्चत" "तमुष्टुहि" इति मन्त्रबोधितपूजाविधायकत्वेन च श्रुत्यागमानां समानार्थत्वात् साक्षाद्वैदिकत्वम् आगमानां "निष्प्रत्यूहम्" (श्रीकरभाष्ये १,२,३, पृ–१८४) इत्यादिना समर्थितश्च । उक्तं च श्रीकण्ठभाष्येऽपि–

"वयं तु वेदशिवागमयोः भेदं न पश्यामः" (श्रीकण्ठ. भा. १,२,३७, पृ– १५६) इति; ब्रह्मप्रणव–पञ्चाक्षरी–प्रसादादि मन्त्राणां पशु–पति–पाशादि– वस्तुव्यवहाराणां भस्मोद्धूलनत्रिपुण्ड्रधारण–लिङ्गार्चन–रुद्राक्षधारणादि परधर्माणां अन्येषां च सर्वेषां व्यवहाराणामुभयत्रापि सममेव दर्शनादुभावपि प्रमाणभूतौ वेदागमौ" । तिरुमूलर् महाशयोऽपि तिरुमन्दिराख्ये द्राविडप्रबन्धे वेदागमयोः समप्रामाण्यं प्रतिपाद्य वीरागमप्रतिपादितं वीरमाहेश्वरमतोक्तं षट्स्थलसिद्धान्तं सूचयति । ब्रुवन्ति च डा. रमणशास्त्रिणः– "शैवमतम् आगमान्तम्" इति । सर्. जान्. उड्राफ् महोदयस्तु "शक्तिशाक्ताख्ये स्वकीये प्रबन्धे–"वेदविषयकाः केचित् दुराशयाः आगमेषु निर्मूलिताः" इत्यवदत् । भारतमहाराष्ट्रस्य पूर्वाध्यक्षाः दि. डा. एस्. राधाकृष्णन् महोदयास्तु "विवेकिनोऽस्मत् पूर्वजाः वेदागमान् समयोजयन्" इति स्वाभिप्रायमवोचन् ॥

परामर्शितग्रन्थाः


१. आगमपरिज्ञानम्/प्रभातिलकः : शम्भुलिङ्गशिवाचार्यः, पञ्चाचार्यप्रेस्, मैसूरु–१९८६

२. किरणागमे विद्यापादः : राजरथिन शिवाचारियर् इन्टरनेट् डिजिटल् काफि





३. किरणागमः : उफ्न्त्ल्ण फ्य्फ्ल्न्ळत्ब्फ ऑह राजरथिन शिवाचारियर् इन्टरनेट् डिजिटल् काफि

४. पौष्करागमः : पण्डित के. रामचन्द्र शर्मा, अध्यार् लैब्रारि एण्ड् रिसर्च् सेण्टर् मद्रास

५. वातुलशुद्धागमः, ज्ञानपादः : आगम अकाडेमि, मद्रास्

६. तत्त्वप्रकाशः : भोजराजः

७. श्रीकण्ठभाष्यम् : श्रीकण्ठशिवाचार्यः

८. शैवसिद्धान्तपरिभाषा : कविराज राजशेखरसूर्यभट्टः

९. चन्द्रज्ञानागमः : एम्. शिवकुमारस्वामी

१०. निगमागमसंस्कृतिः : व्रजवल्लभद्विवेदी

११. संस्कृतसाहित्येतिहासः : आचार्यः लोकमणिदहालः

१२. संस्कृत्यसाहित्यविमर्शः : पण्डित द्विज्येन्द्रनाथः



–एस्. पि. दयानन्दः,
शोधच्छात्रः,
संस्कृत अध्ययन विभागः,
मानसगङ्गोत्री,
मैसूरु विश्वविद्यालयः
मैसूरु–२४, कर्नाटक
चरदूरवाणी : 9880642758
**E-mail : spmaradi@gmail.com**


*(एस्. पि. दयानन्द महाभागः मैसूरु महानगरे स्थितस्य युवराज महाविद्यालयस्य सह–प्राध्यापकानां संस्कृतविभागस्य मुख्यस्थानां च डा. वै. सि. नञ्जुण्डय्य महोदयानां मार्गदर्शनेन "शैवागमे किरणागम–पौष्करागमयोः ज्ञानपादमधिकृत्य तौलनिकमध्ययनम्" इत्यस्मिन् विषये मैसूरु विश्वविद्यालये संशोधनकर्मणि रतः ।)

*********

उपसंहारः

वेदोपनिषदि वीरशैवसिद्धान्तस्य गरिमा, वीरशैवसिद्धान्तोपासकाः भक्तजनसमुदायं प्रति आणव, कार्मिक, मायियरूपत्रिविधमलेन भयङ्कररूपगजरूपेण व्यापितमलान् दूरीकरणविषये सिंहस्वरूपरीत्या प्राप्यमाना, शिवस्य उपासनं कृत्वा, तादृशमलान् दूरीकृतं भवन्ति । पापरूपेण दावाग्निदहन– उपशमनार्थं शीतलजलस्वरूपं शिवमेवम् उपासनं कृतवन्तः तादृश परशिव एव आचारलिङ्ग, गुरुलिङ्ग, शिवलिङ्ग, चरलिङ्ग, प्रसादलिङ्ग, भावलिङ्गरूपषट् स्थलमार्गेण अवतारयति उद्धरिष्यति च ।

तादृशपरमात्मा परशिवस्य सद्योजात, वामदेव, अघोर, तत्पुरुष, ईशानं च रूपेण पञ्चमुखेषु श्री रेणुक, धारुक, घण्टाकर्ण, धेनुकर्ण तथा विश्वकर्ण इति पञ्च प्रमथाः इति अवतारस्वरूपेण श्रीरेवणाराध्य, श्रीमरुलाराध्य, श्रीएकोरामाराध्य, श्रीपण्डिता– राध्या तथा विश्वाराध्या इति पञ्चाचार्याः उद्भवति । एतेषां संस्थापित पीठान् एव पञ्चपीठानि, एते एव परमात्मस्वरूप ईश्वरस्य पञ्चमुखानि एतेषां द्वारा एव निश्चितं वीरशैव सम्प्रदायं दिव्यमार्गे देदीप्यमानेन लोके प्रज्वलति ।

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वेदेवाः ।
स्वस्ति न स्ताक्ष्यो॑ऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

मुण्डकोपनिषत्, १.२.२.

मूलं विद्या शिवः शैवं सूत्रं पञ्चाक्षरस्तथा ।
एतानि नामधेयानि कीर्तितानि महामनोः ॥

सिद्धान्तशिखामणिः, ८. २३.

उपरि उक्त मुण्डकोपनिषत् मन्त्रः इष्टलिङ्गधारणविषयम् एव निरूपितम् । कीर्तिशालि देवेन्द्रः वीरशैववेदपुरुषरीत्या शिवलिङ्गं धारयति । तमेव भगवान् श्रीसूर्यनारायण विश्वदेवः पक्षिराजगरुडः शुभप्रदायकः भगवान् विष्णुः तथा देवगुरु, आचार्यः, बृहस्पति अपि इष्टलिङ्गं धारयति । मङ्गलसदृशः परशिवस्य नमः शिवाय इति पञ्चाक्षरमहामन्त–उच्चारेण, श्रवणेन, सकलदुरितानि दूरीकृतानि, तथा श्रीरेणुकभगवत्पादाचार्यः पञ्चाक्षरीमहामन्त्रस्य महिमाविषये



अन्येषां सम्पत्यै आशा न कार्या । एतादृशः अद्भुतः उपदेशः अस्मिन् मन्त्रे अस्ति । एवमेव मुण्डकोपनिषद्यपि अनेकेषां जगत् सृष्टिकारणानां ज्ञानं भवति । प्रथमं तावत् मुण्डकोपनिषदः सूक्ष्मविषयान् अवलोकयामः । महत्त्वपूर्णायाः अस्याः उपनिषदः विशेषाधिकारिणः सन्यासिनः । अस्यां खण्डद्वयमस्ति । ६४ (चतुष्षष्टिः) मन्त्राः सन्ति । त्रयाणाम् अध्यायानां 'मुण्डक' इति नाम । ब्रह्म– अथर्ववादिभिः उपदिष्टां ब्रह्मविद्याम् आचार्यश्रेष्ठः अङ्गिरसः सम्प्राप्य संसारप्रविष्टाय शौनकाय च साङ्गोपाङ्गमनुप्तग्रह । इदञ्च मुण्डकोपनिषदः प्रथममुण्डकस्य प्रथमखण्डे, लिङ्गधारणात्मकशाम्भवदीक्षासम्पन्नेन ब्रह्मणा ब्रह्मविद्यासम्प्रदाय कर्तृकथनात्मकोपदेशरूपेण उल्लिखितमस्ति ।

ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम् अथर्वाय ज्येष्ठपुत्राय प्राह ॥

मुण्डकोपनिषत्, १.१.१.

विष्णादीनां ज्येष्ठः चतुर्मुखः स्वपितुः परमेश्वरादुत्पन्नोऽभूत्, न तु स्वयमाविर्भूतः । चराचरात्मकस्य जगतः सृष्टा । जगतः पालयिता । चतिर्मुखः वेदितव्यम् । सर्वविद्याधिष्ठानभूतम्, अथर्वाय उपदिदेश ।

एवं विद्या द्विधा इति प्रोक्तम् । अस्याः उपनिषदः प्रथमः प्रकारः 'परा' विद्या ब्रह्मज्ञानबोधिका विद्या परा विद्या । ब्रह्मेतर स्थानबोधिका अथवा लौकिकज्ञानबोधिका विद्या अपराविद्या । पराविद्या जगतः सकलवस्तूनाम् आधारभूतं मूलतत्त्वज्ञानं न बोधयति । जगतः सकलज्ञानविशेषव्याप्तौ सत्यामपि सा परिपूर्णा न ।

एवम् अथर्वणस्य पापानत्सु कर्तनशीलतया अस्याः 'मुण्डकोपनिषत्' इति नाम कृतम् । अस्यां मुण्डकत्रयं भवति । मुण्डके एकैकस्मिन् खण्डद्वयमस्ति । ब्रह्मा प्रथमं ब्रह्मविद्यां स्वज्येष्ठपुत्राय अथर्वणे उपदिदेश । तस्मात् अङ्गिरस शिष्यः, तस्मात् भारद्वाजः, तस्माच्च अङ्गिराः विद्यां प्राप इति गुरुपरम्परा वदति । तत्त्वज्ञानपिपासुः शौनकः कदाचित् अङ्गिरसमुपेत्य 'जगत् सृष्टेः कारणं विज्ञानं किमिति' पप्रच्छ । तस्य प्रश्नस्य परिपूर्णमुत्तरमेवोपनिषद्रूपेण समुदितम् । अस्यां बोधिते परा अपरा इति द्वे विद्ये

वेदितव्ये । अपरा विद्याशाखायां सर्वे वेदाः, वेदाङ्गानि षट्, सकलकलाः, समग्रलौकिकविद्याः अन्तर्भूताः । नामरूपात्मकस्य जगतः समग्रस्य सृष्टेः अक्षरस्य मूलकारपात्रप्रतिपादनाय मुण्डकोपनिषदि एवमुक्तम्–

तदेतत् सत्यम्, यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः
सहस्रशः प्रभवन्ते सरूपाः ।
तथाऽक्षरद्विविधाः सोम्यभावाः प्रजायन्ते तत्र चैवापियन्ति ।
यथोर्णनाभिः सृजते गृह्यते च यथा पृथिव्यामोषधयः सम्भवन्ति ॥
यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम् ॥

मुण्डकोपनिषत्, २.१.१., १.१.७.

विस्फुलिङ्गाः सुदीप्तात् पावकात् यथा सहस्रशः अग्न्यंशाः प्रभवन्ते तदा भो सौ म्यः अक्षरात् जगत् सृष्टिकारणीभूतः विविधजीवाः प्रजायन्ते तदा तेनेपि लीनीभूतः । घट इत्यादि उपाधिद्वारा केचन कनिष्ट आकाशोत्पत्तिलयानां प्रति कदा महाकाशः कारणीभूतः तदा नामरूपेषु सम्प्राप्तदेहोपादीनां प्रति जीवानाम् उत्पत्तिलयविषये अक्षरेव कारणीभूतः भवति इति । एतादृश मूलतत्त्वज्ञानम् अयं मुण्डकोपनिषदि प्रत्पादितः ।

चराचरात्मकरूपम् अयं जगत् सृष्टिः अक्षर एव कारणम् इति उक्त्वा द्वारा परशिवब्रह्म एव जगतः सृष्टिविषये उपादानकारणं, निमित्तकारणमपि च प्रतिपादितः । परन्तु तादृश विषयदृढीकरणार्थम् ऊर्णनाभिदृष्टान्तः उपरि निरूपितम् । विवरणम् एवं वर्तते । यथा ऊर्णनाभिः पटतन्तून् सृजते गृष्णते च आहारसम्पादनप्राप्यानन्तरं तेषां स्वीकृतं करिष्यति, यदा पृथिव्यां ओषधयः सम्भवन्ति, यथा सतः पुरुषात् केशलोमानि सम्भवन्ति तथा अक्षररूपेण जगदिदं सम्भवति इति सैद्धान्तिकरूपेण निरूपितः । तदर्थं जगतः प्रति सृष्टिविषये यः निमित्तमपि न इच्छत्, अक्षरेण मात्रं विलक्षणं सुलक्षणम् अपि इदं जगत् संसारमण्डले सृजति इति स्पष्टयति । मुण्डकोपनिषदि उक्त "सत्यमेव जयते" इति ध्येयवाक्यं भारतसर्वकारैः अपि स्वीकृतम् एवम् अपि निर्विवादेन परिगणितम् एतदेव अंशः अयम् उपनिषदः विशेषः अंशः ।



सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः ।
येनाऽऽक्रमन्ति ऋषयो ह्याप्तकामाः यत्र तत् सत्यस्य परमं निदानम् ॥
वेदान्तविज्ञानसुनिश्चितार्थाः सन्यासयोगाद्यतयः शुद्धसत्वाः ।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्छन्ति सर्वे ॥
यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यम् ॥

मुण्डकोपनिषत्, ३.१.६., ३.२.६, ८.

सत्यमेव जयते, असत्यं यावदपि न जयते धर्म, अर्थ, काम, मोक्ष इति चतुर्विधपुरुषार्थेषु पोषकरूपेण सत्यं यावदस्ति, आप्तकामः ऋषयः ध्यानं करोति, तादृश देवमानवपन्था सत्येन आवृतः इति । एतादृश विषयः जगत्सृष्टिविषयं दृढी करोति । जगत्सृष्टिमूलकारणीभूतम् अक्षरज्ञानेन देहधारणं कृतवन्तः, वेदान्तविज्ञानविषयं सम्यक् ज्ञात्वा मुमुक्षुः, चरमकाले ब्रह्मभूतावृतः मुक्ताः भवन्ति, इति सत्यांशं मुण्डकोपनिषदुक्तः, उपरि निरूपित अन्यमन्त्रेण समर्थितं भवति ।

वेदान्तविज्ञानस्य अर्थः सम्यक् ज्ञात्वा, द्वारा निर्धारं कृतवन्तः ब्रह्मनिष्ठाः सन्यासयोगद्वारा शुद्धसत्वाः भवन्ति, ते सर्वे साधकाः भवन्ति । अनेकत्वे एकत्वं साधयन्ति इति जगत्सृष्टिकारणस्य मूलमन्त्रं ते सर्वे चरमकाले नामरूपं परिमुच्छन्ति परामृताः भवन्ति । तदर्थं देहपरित्यागस्य समये संसारिणः अपरान्तकालसम्पन्नाः भवन्ति तदा मुमुक्षुः परान्तकाले सम्पन्नाः भवन्ति । जगत्सृष्टिविषये मुमुक्षूणां जीवनवैशिष्ट्यमहोन्नतसन्देशं वक्तुं विषयः एवं निरूपितम् ।

यदा पर्वतेषु वनेषु सृजत(उद्भवित) नद्यः गङ्गा, यमुना, गोदावरी, सरस्वती, नर्मदा, सिन्धु, कावेरी इत्यादि नामरूपं प्राप्य अन्तिमतया समुद्रं गच्छन्ति विलीनीभूत्वानन्तरे तादृशनामानं विहाय, तथा जगत्सृष्टिसन्दर्भे जनितविद्वांसः लोकोत्तरनामानं प्राप्नोत्येव अन्तिमतया नामरूपेण विमुक्तः भवति । परात्परं, दिव्यमपि स्थानम् उपैति तदर्थं पूर्वोक्तजगत्सृष्टिकारणीभूतम् अक्षरं प्रति सः श्रेष्ठः भवति ।

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XIV : July to December – 2019

# कैवल्यसारग्रन्थोक्तरीत्या महालिङ्गस्थले स्वीकृतप्रसादिस्थलशिष्टोदनस्थलयोः स्वरूपम्

विद्वान् डा. के. एम्. महदेवय्यः (मैसूरु)*

पीठिका–

शक्तिविशिष्टाद्वैतसिद्धान्ते साधकः षट्स्थलारोहणमार्गेण परमात्मना साकं क्रमिष्यति । अयं विषयः कैवल्यसारग्रन्थे श्रीमरितोण्टदार्याः वीरशैवानां षट्स्थलमार्गमनुसृत्य परमात्मनः साक्षात्कारप्राप्तिसरणिं वेदोपनिषदाम् आधारेण मनोज्ञं निरूपितवन्तः । तत्र पूर्वार्धे, उत्तरार्धे । अङ्गस्थलम्– ४४, लिङ्गस्थलम्– ५७ च इति स्थलं द्विविधम् । प्रत्येकस्मिन् षट् मुख्यस्थलानि सन्ति । अङ्गस्थलानि– भक्त–माहेश–प्रसादि–प्राणलिङ्गि–शरण–ऐक्यभेदेन । षट्लिङ्गस्थलानि–आचार लिङ्ग–गुरुलिङ्ग–शिवलिङ्ग–जङ्गमलिङ्ग–प्रसादलिङ्ग–महालिङ्गभेदेन षट् ।

अस्मिन् लेखने कैवल्यसारग्रन्थोक्तरीत्या लिङ्गस्थलेषु महालिङ्गस्थले स्वीकृतप्रसादिस्थलशिष्टोदनस्थलयोः स्वरूपम् एवं रूपेण निरूपितं वर्तते ।

स्वीकृतप्रसादस्थलस्वरूपम् :

एवं प्रकाशलिङ्गम् ऐक्ये ऐक्यस्थलान्तर्गतनवविधलिङ्गस्थलानां नामानि एवं वर्तते । स्वीकृतप्रसादिस्थलम्, शिण्टोदनस्थलम्, चराचरलय– स्थलम्, भाण्डस्थलम्, भाजनस्थलम्, अङ्गलेपनस्थलम्, स्वपराज्ञस्थलम्, भावाभावलयस्थलम्, ज्ञानशून्यस्थलं च इति । परिणामग्राहकत्वं लब्ध्वा सोऽपि तस्मिन् लिङ्गे परिणामग्राहकत्वं प्राप्य भिन्नभावपरित्यागेन परमानन्दपरिणामत्वं प्राप्तभेदः कथम्? इति आकाङ्क्षायाम् अनन्तरम् उच्यते एतत् स्वीकृत–प्रसादिस्थलम् इति ।

पूर्वोत्तरसङ्गतिः :

अनन्तरम् एवं प्रसादलिङ्गपरिणामः शरणः अधिष्ठानसामरसेन महा–



अगस्त्यमुनिम् उद्दिष्य एवं बोधयति । अयं विषयः श्रीशिवयोगि शिवाचार्यविरचितसिद्धान्तशिखामणौ उपरि मन्त्रे निरूपितः । तदर्थं मूला, विद्या, शिव, शैवसूत्र, पञ्चाक्षरश्च पर्यायरूपमहान्त्रान् भवन्ति ।

शिवस्य पञ्चाक्षराणि : न मः शि वा य परशिवः जनितः ।

षट् स्थलमार्गानि : आचारलिङ्गम्, गुरुलिङ्गम्, शिवलिङ्गम्, चरलिङ्गम्, प्रसादलिङ्गम्, भावलिङ्गम् च इति ।

परशिवस्य पञ्चमुखानि : सद्योजात, वामदेव, अघोर, तत्पुरुष, ईशान च ।

परशिवस्य जनितः पञ्चप्रमथाः– रेणुक–दारुक–घण्टाकर्ण–धेनुकर्ण–विश्वकर्णः च ।

पञ्चाचार्याः– रेदणाराध्यः, मरुलाराध्यः, एकोरामाराध्यः, पण्डिताराध्यः, विश्वाराध्यः च ।

पञ्चपीठानि– रम्भापुरि, उज्जयनि, केदार, श्रीशैल, काशी च ।

पञ्चध्वजानि– हसिरु (शुकवर्ण), केसरि, नीलम्, श्वेतः, पीतः च ।

पञ्चसङ्केताक्षराणि– नकार, मकार, शिकार, वाकार, यकार च ।

पञ्चलिङ्गक्षेत्राणि– कोल्लीपाकि, उज्जयनि, केदार, श्रीशैल, काशी च ।

पञ्चलिङ्गानि– सोमेश्वर, महाकाल, भीमाशङ्कर, मल्लिकार्जुन, विश्वनाथश्च ।

प्रधान–इष्टलिङ्ग–आराधकाः– देवेन्द्र–सूर्य–विधदेव–गरुड–विष्णु–बृहस्पति च ।

एतेषु विषयेषु विना अन्य आगमेषु च अपि एते विषयानां निरूपणं सन्ति । परन्तु तत्कारणेन वीरशैवसिद्धान्तः जगत्सृष्टिविषये असाधारणरूपेण सम्यक् प्रतिपादितः अस्ति ।

एतादृश विषये विशिष्टविषयं बोधयति, एतादृश सिद्धान्तितवैशिष्ट्यं श्रीकरभाष्येऽपि एवं निरूपितम् ।

श्रुत्यैकदेशप्रामाण्यं द्वैताद्वैतामतादिषु ।
द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञके ।
वीरशैवकसिद्धान्तं सर्वश्रुतिसमन्वय ॥

इति निरूपणपूर्वकं लेखनं परिसमाप्तं भवति ।

## परामर्शितग्रन्थाः

१. मुण्डकोपनिषत् : वीरशैवभाष्यम्, शाङ्करीव्याख्या सहिता, उमचगि शङ्करशास्त्रिभिः सम्पादितम् ।
२. श्रीकरभाष्यम् : सम्पुट ०१, ०२, श्रीपतिपण्डिताचार्यविरचितम्, प्राच्यसंशोधनालयः, मैसूरु–१९७७, १९७८
३. क्रियासारः : श्रीनीलकण्ठशिवाचार्यविरचितः, भागत्रयोपेतः, प्राच्यसंशोधनालयः, मैसूरु–१९५४
४. अनुभवसूत्रम् : श्रीमायिदेवविरचितम्, विमर्शात्मकपरिष्करणम्, विद्वान् हेच्. पि. मल्लेदेवरु, प्राच्यसंशोधनालयः, मैसूरु–१९८३
५. चन्द्रज्ञानागमः : (क्रियाचर्यपादौ) भाषानुवाद, टिप्पणीसहितः, सम्पादकः, पं. व्रजवल्लभद्विवेदी, प्रकाशकः, शैवभारती, शोधप्रतिष्ठानम्, जङ्गमवाडिमठम्, वाराणसी–२२१००१, १९९४
६. महानारयणोपनिषत् : वीरशैवभाष्यम्, श्रीउमचगिशङ्करशास्त्रिकृत एडिटेड् शैवभाष्यम्, श्रीवृषभदेवकृतम्, काशी ।
७. लिङ्गधारणचन्द्रिका : श्रीनन्दिकेश्वरशिवाचार्यविरचितः, शिवकुमारव्याख्यासहितः, काशी–१९०५
८. सिद्धान्तशिखामणिः : श्रीशिवयोगिशिवाचार्यविरचितः, श्रीकाशीनाथशास्त्रिकृत भावप्रकाशव्याख्या, (कर्नाटकभाषा) पञ्चाचार्य प्रेस्, मैसूरु, १९८२
९. सिद्धान्तशिखोपनिषत् : (शाङ्करीव्याख्यासहितम्) श्रीउमचगिशङ्करशास्त्रिकृत एडिटेड् शैवभाष्यम्, श्रीवृषभदेवकृतम्, काशी ।



१०. कैवल्यसारः : श्रीमरितोण्टदाचार्यविरचितः, सम्पादकः, विद्वान् हेच्. पि. मल्लेदेवरु, टिप्पणीसमलङ्कृतः, प्राच्यसंशोधनालयः, मैसूरु–१९८८
११. वीरशैवेन्दुशेखरः : व्याकरणतीर्थेन पं. सदाशिवशास्त्रिणा विरचितः, श्रीमहालिङ्गस्वामिना काश्यां जङ्गमवाडिमठे संस्थाने प्रकाशितः ।
१२. शिवद्वैतमञ्जरी : स्वप्रभानन्दशिवाचार्यविरचितः, पञ्चाचार्य एलेक्ट्रिकल् प्रेस्, मैसूरु ।

–चन्द्रशेखरय्यः,
विद्यावारिधी (पिहेच्.डि.) छात्रः,
कर्नाटकसंस्कृतविश्वविद्यालयः,
चामराजपेटे–560018
बेङ्गळूरु, कर्नाटक
चरदूरवाणी–9008190647

*(विद्वान् चन्द्रशेखरय्य महाभागः मैसूरु महानगरे स्थितस्य सर्वकारीय संस्कृतमहाविद्यालयस्य प्राचार्याणां, शक्तिविशिष्टाद्वैतवेदान्तविभागस्य मुख्यस्थानां प्राध्यापकानां च विद्वान् डा. के. एम्. महदेवय्य महोदयानां मार्गदर्शनेन “शक्ति–विशिष्टाद्वैतानुसारेण मुण्डकोपनिषदः विशिष्टम् अध्ययनम्” इत्यस्मिन् विषये कर्नाटकसंस्कृतविश्वविद्यालये संशोधनकर्मणि रतः ।)

*******

अद्वैतबोधेन (शिवज्ञानेन भेदावेशस्य तदर्थं अङ्गलिङ्गयोः भेदभावं दूरीकृत्वा तथा च महा संवित् चिच्छक्ति) प्रकाशं साक्षात् कृत तदर्थं अनुभवात्मकज्ञानं ज्ञात्वा योगिनः बन्धनं नास्ति । अग्नौ अर्पिते काष्ठादिकं यत् तन्मयं सर्वं ज्ञायते तदा जगदेतत् चराचरं चिदात्मनि शिवे न्यस्तम् इति स्वीकृतप्रसादि ज्ञात्वा । एकविज्ञानेन सर्वविज्ञानम् इति उपनिषद् वचनानुसारेण सर्वेषां कारणीभूतपरशिवं ज्ञात्वानन्तरं समस्तः अपि तस्य स्वरूपं भवति ।

वासिष्ठे–

नान्यत् पश्यति योगीन्द्रः नान्यज्जानाति किञ्चन ।
नान्यच्छृणोति सन्दृष्टे चिदानन्दमये शिवे ॥

योगीन्द्रः न अन्यत् पश्यति । अन्यत् न किञ्चन जानाति, किमपि न शृणोति । चिदानन्दमये शिवे सर्वमपि अर्पणीयम् । अर्थात् ज्ञानानन्दमये शिवे सम्यक् दृष्टे साक्षात् कृते सति, अन्यत् तद्व्यतिरिक्तं यत्किञ्चदस्ति तत्सर्वम् इति अभिमतम् ।

तत्रैव–

न वाञ्छिता न त्यजिता ज्ञेयं प्राप्यं स्वभावतः ।
सरितः सागरेणैव भोक्तव्या भोगभूमयः ॥

न वाञ्छिता, न त्यजिता ज्ञेयं प्राप्य स्वभावतः । सरितः सरोवरः सागरेणैव समुद्रेणैव भोक्तव्या भोगभूमयः इति भावः ।

## शिष्टोदनस्थलम्–

एवं परमानन्दप्रसादजनितसुखमालिङ्ग्य तृप्तिलिङ्गमैक्ये स्वयं स्वस्वरूपत्वेन स्थितिभेदः कथम्? इति अभिलाषायाम् अनन्तरं शिष्टोदनस्थलम् इत्युच्यते ।

बृहदारण्यकोपनिषदि–

एतद्वै तदक्षरं गार्गि ! ब्राह्मणा सत्यं वदति । अस्थूलम्, अनणु, अह्रस्वम्, अदीर्घम् तस्मात् अत्र आदेशः इत्युक्ते उपदेशः इति भावः ।

तथैवोक्तं वातुले–

नेति नेतीति नेतीति शेषितं यत् परं पदम् ।



लिङ्गैक्यं गन्तुम् उद्युक्तः व्यापकलिङ्गत्रैविद्यनिष्ठतया प्रतीतः सन् तथाविध ऐक्ये सर्वाचारसम्पत्तेरेव कारणत्वात् अधिष्ठानलिङ्गत्रैविध्ये निजस्वरूपमवगम्य एक–भाजनसहभोजनयोः अर्पितसामरस्येन अतीतलिङ्गत्रैविध्यनिष्ठत्वेन निरवयवः भूत्वा स्थायित्वमेव परशिवस्वरूपत्वम् इति सिद्धम् ।

बृहदारण्यकोपनिषदि–

यत्रास्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्, तत्केन कं जिघ्रेत्, तत्केन कं श्रावयेत्, तत्केन कं स्पृशेत्, तत्केन कमास्वादयेत् ॥

यस्याम् अवस्थायाम् अस्य योगिनः सर्वं परब्रह्मैव अभूत् । केन साधनेन परब्रह्मेतरं पश्येत् कं जिघ्रेत् घ्राणेन्द्रियेण वासनम् ? केन कं श्रावयेत् ? केन स्पृशेत् ? केन आस्वादयेत् ? इति भावः ।

किञ्च वृद्धजाबालोपनिषदि–

भुक्तशेषं भगवतः त्रैलोक्यं सचराचरम् ।
त्रैलोक्यं सचराचरं भगवतः प्रसादरूपम् ॥

किञ्च मुण्डकोपनिषदि–

संनिहितं गुहाचरं नाम महत्पदं अत्रैतत् सर्वमर्पितमेतत् प्राणं निमेषश्च यत् ॥

संनिहितं दहराकाशमध्यस्थं नाम श्रेष्ठं पदम्– स्थानम् । अत्र एतत् सर्वम् अर्पितम् एतत् प्राणं निमेषश्च यत् ।

किञ्च तलवकारोपनिषदि–

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते,
यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते,
यच्छोत्रेण न श्रुणोति येन श्रोत्रेणेदं श्रुतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते,
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

यत् वाचा नोक्तम्, येन वाक् वदति, रदेव ब्रह्म, तदेव त्वं विद्धि । न इदं यत् इदम् उपासते, यत् चक्षुषा न पश्यति, येन चक्षूंषि पश्यति, तदेव ब्रह्म,

त्वं तत् विद्धि, इदं न यदिदम् उपासते, यत् श्रोत्रेण न शृणोति, येन श्रोत्रेण इदं श्रुतं, तदेव ब्रह्म त्वं विद्धि, यत् इदं न उपासते, यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि, न इदं यदिदम् उपासते ॥

तथैवोक्तं शिवयोगदीपिकायाम्–

आदाय बाह्यविषयान् इन्द्रियमार्गैरहङ्कृतौ चेतः ।
अर्पयति सा च बुद्धौ बुद्धेः साक्षी ततः पुमान् भुङ्क्ते ॥

बाह्यविषयान् आदाय इन्द्रियमार्गैः चेतः अहङ्कृतौ अर्पयति इत्यर्थः । सा च बुद्धौ बुद्धेः साक्षी ततः पुमान् जीवः भुङ्क्ते अनुभवति इति भावः ।

किञ्च शिवसूत्रे–

स्वात्मार्पणं विकल्पानां अर्पणं शिवधामनि ।
तृप्तिसङ्कोचविलयविकासशिवचित्सुखम् ॥

स्वात्मार्पणं सन्देहानाम् अर्पणं शिवधामनि । तृप्तिः, सङ्कोचः, विलयः, विकासः, शिवः, सुखमयज्ञानस्वरूपम् इति ।

लिङ्गसरे–

जन्मत्रयमिदं वक्ष्ये स्थित्युत्पत्तिविनाशनम् ।
सङ्कल्पितार्पितं भावं अर्पितत्रयमुत्तमम् ॥

त्रयमिदं जन्म वक्ष्ये– स्थिति, उत्पत्ति, विनाशनम् इति । सङ्कल्पितार्पितं भावम् अर्पितत्रयम् उत्तमम् इति ।

आधिव्याधिमहाशखं त्रिविधं लिङ्गार्पितं सदा ।
बाल्ययौवनवृद्धत्वं त्रिविधं लिङ्गार्पितं सदा ॥

आधिः, व्याधिः, महाशखं त्रिविधं सदा लिङ्गार्पितम्, एवमेव बाल्य, यौवन, वृद्धत्वं त्रिविधम् इति सदा लिङ्गार्पितम् इति ।

विस्मयं जननं निद्रा सर्वं लिङ्गे समर्पितम् ।
कृष्णं श्वेतं च पीतं च स्वयं लिङ्गे समर्पितम् ॥



विस्मयं, जननं, निद्रा सर्वमपि लिङ्गे समर्पितम् । कृष्णं, श्वेतं, पीतम् एते अपि स्वयं लिङ्गे समर्पितम् ।

उत्पत्तिस्थितिपर्यन्तं सुखदुःखेषु सर्वथा ।
सम्पदश्च व्युदासोऽहं सर्वद्रव्यं समर्पितम् ॥

उत्पत्तिस्थितिपर्यन्तं सर्वथा सुखदुःखेषु सम्पदश्च तिरस्कृतः । आत्मानमेव सर्वद्रव्यरूपेण समर्पितम् इत्यर्थः ।
स्वीकृतप्रसादिस्थलस्वरूपं सिद्धान्तशिखामणौ एवं प्रतिपादितम्–

मुख्यार्थो लक्षणार्थश्च यत्र नास्ति चिदात्मनि ।
विशृङ्खलतया तस्य प्रसादः स्वीकृतो भवेत् ॥
मातृमेयप्रमाणादि व्यवहारे विहारिणीम् ।
संवित्साक्षात्कृतिं लब्ध्वा योगी स्वात्मनि तिष्ठति ॥
अद्वैतबोधतिर्धूत भेदावेरास्य योगिनः ।
साक्षात्कृतमहासंवित् प्रकाशस्य क्व बन्धनम् ॥
चिदात्मनि शिवे न्यस्तं जगदेतच्चराचरम् ।
ज्ञायते तन्मयं सर्वम् अग्नौ काष्ठादिकं यथा ॥
न भाति पृथ्वी न जलं न तेजो नैव मारुतः ।
नाकाशो न परं तत्त्वं शिवे दृष्टे चिदात्मनि ॥

(सिद्धान्तशिखामणिः, २०. २०–६–१०)

यत्र चिदात्मनि मुख्यार्थो वा लक्षणार्थश्च न सम्भवति तस्य चिदात्मनः प्रसादः निशृङ्खलतया (यत्र विघ्नं नास्ति) यत्र योगिः स्वीकृतो भवेत् सः एव स्वीकृतप्रसादि इति कथयति तदर्थम् अङ्गलिङ्गयोः औपाधिकभेदं वक्तुं मुख्यार्थः तत् भेदं विमुक्त्वा उपाधिरहित–अङ्गलिङ्गयोः चैतन्ययोः सामरस्यं बोध एव लक्षणार्थः । एतादृश वाच्यार्थलक्षणार्थविषयलक्षणयोः ज्ञात्वा लक्ष्यलक्ष्यं प्राप्यमान–अनन्तरं लिङ्गाङ्गसामरस्य–अनुभूतरूपप्रसादप्राप्तुं एव स्वीकृतप्रसादिस्थलस्य अर्थः । प्रमातृ, प्रमाण, प्रमेयादि त्रिपुरिप्रपञ्चस्य व्यवहारे विहारिणीं संवित् साक्षात् कृतिं चिच्छक्तिं (अनुभवात्मक आत्मा साक्षात्कारं) लब्ध्वा योगिः स्वात्मनि तिष्ठति ।

७. वीरशैवेन्दुशेखरः : व्याकरणतीर्थेन पं. सदाशिवशास्त्रिणा विरचितः, श्रीमहालिङ्गस्वामिना काश्यां जङ्गमवाडिमठे संस्थाने प्रकाशितः, १८५४
८. श्रीकरभाष्यम् : सम्पुट ०१, ०२, श्रीपतिपण्डिताचार्यविरचितम्, प्राच्यसंशोधनालयः, मैसूरु–१९७७, १९७८
१०. श्वेताश्वतरोपनिषत् : वीरशैवभाष्यम्, वि. डा. टि. जि. सिद्धप्पाराध्यविरचितः, कन्नडानुवादसहितम्, मैसूरु
११. सिद्धान्तशिखामणिः : श्रीशिवयोगिशिवाचार्यविरचितः, श्रीकाशीनाथशास्त्रिकृत भावप्रकाशव्याख्या, (कर्नाटकभाषा) पञ्चाचार्य प्रेस्, मैसूरु, १९८२
१२. सिद्धान्तशिखामणिः : श्रीशिवयोगिशिवाचार्यविरचितः, विमर्शात्मकपरिष्करणम्, प्राच्यविद्यासंशोधनालयः, मैसूरु, १९८२
१३. लिङ्गधारणचन्द्रिका : शिरसि गुरुशान्तशास्त्रिगळु, (कन्नडभाषा) मैसूरु–१९५१
१४. चन्द्रज्ञानागमः : (क्रियाचर्यपादौ) भाषानुवाद, टिप्पणीसहितः, सम्पादकः, पं. व्रजवल्लभद्विवेदी, प्रकाशकः, शैवभारती, शोधप्रतिष्ठानम्, जङ्गमवाडिमठम्, वाराणसी–२२१००१, १९९४
१५. शक्तिविशिष्टास्वैतदर्शनम् : वि. डा. टि. जि. सिद्धप्पाराध्यविरचितम्, मैसूरु विश्वविद्यालयः, मैसूरु–१९६१
१६. ब्रह्मसूत्रश्रीकण्ठभाष्यम् : श्रीमदप्पय्यदीक्षितकृतशिवार्कमणिदीपिकासहितम्, (चतुःसूत्री भागः) सम्पादकः, पं. व्रजवल्लभद्विवेदी, प्रकाशकः, शैवभारती, शोधप्रतिष्ठानम्, जङ्गमवाडिमठम्, वाराणसी– १९८६

विद्वान् डा. के. एम्. महदेवय्यः,

प्राध्यापकः, शक्तिविशिष्टाद्वैतवेदान्त विभागः, प्रांशुपालश्च,
सर्वकारीयमहाराजासंस्कृतमहाविद्यालयः,
कर्नाटकसंस्कृतविश्वविद्यालयस्य घटकमहाविद्यालयः,
न्यू सय्याजिराव् रोड्, मैसूरु–२४, कर्नाटक
चरदूरवाणी : 9980057563

**********



निराकर्तुमशक्यत्वात् तदस्मीति सुखी भवेत् ॥

यत्परं पदं न स्यात् । तत् अस्मीति सुखी भवेत् नेति नेति इति निराकर्तुम् अशक्यत्वात् ।

चन्द्रावलोकने–

चित्तत्वैकस्वरूपस्य न स्यात् ज्ञेयादिकं क्वचित् ।
यद्यत् स्थितं तत्तदस्य भासा ज्ञानमयं मतम् ॥

चित्तस्वरूपम् एकमेव स्वरूपस्य क्वचित् ज्ञेयादिकं न स्यात् । यद्यत् स्थितं तत् तदस्य ज्ञानमयं मतं भासा–तेजसा इति भावः ।

किञ्च सूतसंहितायाम्–
गुरूपदेशेन शिवं विलोकयेत् विलोकनेनापि शिवं विलोकयेत् ।
विलोकनं चापि विसृज्य केवलं स्वभावभूतं क्वचिदेव शिष्यते ॥

गुरूपदेशेन शिवं विलोकयेत्, विलोकनेन स्वयम् अवलोकनेनापि शिवं विलोकयेत्, विलोकनं चापि केवलं विसृज्य स्वभावभूतं स्वज्ञानमेव शिष्यते इति । अथ शिष्टोदनस्थलविषयः सिद्धान्तशिखामणौ एवं निरूपितम्–

प्रकाशते या सर्वेषां माया सैवोपनाकृति ।
लीयते तत्र चिल्लिङ्गे शिष्टं तत्परिकीर्तितम् ॥
जगदङ्गे परिग्रस्ते मायापाराविजृम्भिते ।
स्वात्मज्योतिषि बोधेन तदेकमवशिष्यते ॥
अखण्डसच्चिदानन्द परब्रह्मस्वरूपिणी ।
जीवन्मुक्तस्य धीरस्य माया कैङ्कर्यवादिनी ॥
विश्वं सम्मोहिनी माया बहुशक्तिनिरङ्कुशा ।
शिवैकत्वमुपेतस्य न पुरः स्थातुमीहते ॥
ज्योतिर्लिङ्गे चिदाकारे निमग्नेन महात्मना ।
भुज्यमाना यथायोग नश्यति विषया स्वतः ॥
शब्दादयोऽपि विषया भुज्यमानास्तदिन्द्रियैः ।
आत्मन्येव विलीयन्ते सरितः सागरे यथा ॥

(सिद्धान्तशिखामणिः, २०. १४–१९)

तात्पर्यम्–

सर्वेषां (तनुकरण, भुवन भोगादिरूपे) या प्रकाशते, या अन्तिमे चिल्लिङ्गे लयं प्राप्नोति च तदेव माया शिष्टं इति कीर्तितम् । अयं शिष्टमाया योगिनां प्रति ओदन (भक्ष्यरूपम् अन्नम्) एवं कारणेन शिष्टोदन इति नाम्ना कथयति । माया पाशविजृम्भिते कला त्वदारभ्य पृथिवी तत्त्वपर्यन्तं त्रिंशत् तत्त्वरूपेण आवृतः जगदङ्गे परिग्रस्ते स्वात्मज्योतिषि बोधेन तदेकम् अवशिष्यते । माया तत्त्वमेकं शेषः । अखण्डसच्चिदानन्दस्वरूपं परब्रह्मतत्त्वं तस्य स्वरूप इति ज्ञात्वा जितेन्द्रिय जीवन्मुक्तस्य योगि माया कैङ्कर्यवान् इति । विश्वं सम्मोहिनि बहुशक्तिनिरङ्कुशमाया एव शिवे ऐक्यत्वम् उपेतस्य न पुरः स्थातुमीहते । चिदाकारे ज्योतिर्लिङ्गे निमग्नेन महात्मना योगिः अर्पणा विधानक्रमानुसारेण भुज्यमानविषयः स्वतः नश्यन्ति शिष्टोदनस्थलस्य योगिः इन्द्रियैः शब्दाद्यपि भुज्यमानतादृशविषयः सरितः सागरे विलीयन्ते यथा आत्मनि एव विलीयन्ते इति ।

उपसंहारः

श्रीशिवयोगिशिवाचार्यविरचितसिद्धान्तशिखामणिग्रन्थोक्त एवं विषय–निरूपणद्वा लेखनं परिसमाप्तं भवति ।

ज्योतिर्लिङ्गे चिदाकारे ज्वलत्यन्तर्निरन्तरम् ।
विलीनं निखिलं तत्त्वं पश्यन् योगी न लिप्यते ॥
अन्तर्मुखेन मनसा स्वात्मज्योतिषि चिन्मये ।
सर्वानप्यर्थविषयान् जुह्वन् योगी प्रमोदते ॥

(सिद्धान्तशिखामणिः, २०. ११–१२)

अन्तः हृद्रूपाष्टदलकमलमध्ये निरन्तरं चिद्रूपे ज्योतिर्लिङ्गे महालिङ्गे ज्वलति सति, प्रकाशिते सति, तस्मिन्, महालिङ्गे शिवयोगी निखिलं तत्त्वं शिवादिभूम्यन्तं विलीनं लयीभूतं पश्यन् सन् न लिप्यते । तनुकरण–भुवनभोगात्मकषट् त्रिंशत् तत्त्वैः न लिप्यते इत्यर्थः । अथ एतदर्थमेव होमरूपेण विशेषयति– अन्तर्मुखेन मनसा प्रत्यङ्मुखेन मनसा चिन्मये स्वस्वरूपवह्निप्रकाशे समस्तपदार्थान् जुह्वन् तादात्म्येन समर्पयन् शिवयोगी



प्रमोदते इत्यर्थः । अथ स्वीकृतप्रसादिस्थलं समापयति ।

सच्चिदानन्दजलधौ शिवे स्वात्मनि निर्मलः ।
समर्प्य सकलान् भुङ्क्ते विषयान् तत्प्रसादतः ॥

(सिद्धान्तशिखामणिः, २०. १३.)

निर्मलः शिवयोगी सच्चिदानन्दानां समुद्रभूते स्वात्मनि स्वप्रकाशात्मनि शिवे सकलान् शब्दादिपदार्थान् समर्प्य, तत्प्रसादतः तत्प्रसादरूपेण भुङ्क्ते इति ।

अर्थजातमशेषं तु ग्रसन् योगी प्रशाम्यति ।
स्वात्मन्यैव स्थितो भानुः तेजोजालमशेषतः ॥

(सिद्धान्तशिखामणिः, २०. २०.)

शिवयोगी अशेषं पदार्थसमूहं स्वस्वरूपेण ग्रसन् तेजोजालं स्वकिरणसमूहम् अशेषतः यथा भवति तथा ग्रसनम् उपसंहरन् आस्थितः भानुरिव अस्तण् गच्छन् भानुरिव शाम्यति स्वस्थो भवतीत्यर्थः ।

जले जलमिव न्यस्थं वह्नौ वह्निरिवार्पितः ।
परब्रह्मणि लीनात्मा विभागाय न दृश्यते ॥

## परामर्शितग्रन्थाः


१. अनुभवसूत्रम् : श्रीमायिदेवविरचितम्, विमर्शात्मकपरिष्करणम्, विद्वान् हेच्. पि. मल्लेदेवरु, प्राच्यसंशोधनालयः, मैसूरु–१९८३
२. क्रियासारः : श्रीनीलकण्ठशिवाचार्यविरचितः, भागत्रयोपेतः, प्राच्यसंशोधनालयः, मैसूरु–१९५४
३. कैवल्यसारः : श्रीमरितोण्टदाचार्यविरचितः, सम्पादकः, विद्वान् हेच्. पि. मल्लेदेवरु, टिप्पणीसमलङ्कृतः, प्राच्यसंशोधनालयः, मैसूरु–१९८८
४. मुण्डकोपनिषत् : वीरशैवभाष्यम्, श्रीउमचगि शङ्करशास्त्रिकृतं संस्कृतमूलसहितम्, प्रबोधपुस्तकप्रकटना संस्था, मैसूरु
५. लिङ्गधारणचन्द्रिका : श्रीनन्दिकेश्वरशिवाचार्यविरचितः, शिवकुमारव्याख्यासहितः, काशी–१९०५
६. वीरशैवानन्दचन्द्रिका : श्रीमरितोण्टदार्यविरचिता, कन्नडानुवाद, श्रीशिरसि गुरुशान्तशास्त्री, श्रीनन्दिकेश्वर एलेक्ट्रिक् प्रेस्, मैसूरु–१९६०

सुखं दुःखं भयं क्रोधः आयः व्ययः उत्पत्तिः नाशश्चेत्येवं सर्वमपि दैवावलम्बितं कर्म एव । किञ्च असङ्कल्पितमकस्मादञ्जसा प्रवर्तते सङ्कल्पितं चाकस्मा- न्निवर्तते । एतादृशविचित्रलक्षणस्य दैवस्य प्राबल्यादेव तीव्रतरनियमनिष्ठा महान्तस्तपस्विनोऽपि विश्वामित्रादयो कामक्रोधादिवशगा जाताः । अतो लक्ष्मण ! मम यौवराज्याभिषेकनिवर्तने न पितरौ कारणं किन्तु दैवप्राबल्यमेव कारणम् , तद्दैवप्रभावं प्रतिजानीहि इत्यभ्युवाच । एवञ्च श्रीरामस्याकूत्या सर्वात्मना-ऽनिरीक्षितोऽनपेक्षितश्च पट्टाभिषेकाच्च्युतिपूर्वको वनवासः साक्षाद्दैवप्राबल्यसमर्थक इति स्पष्टम् ।

एवं रामायणे बह्वत्र दैवप्राबल्यप्रतिपादनसन्दर्भा विपुलाः । अनेन रामस्य रामायणस्य च दैवप्राधान्यप्रतिपादनपरत्वं चिन्तनीयं भवति । तदन्ते क्रियते ।

## पुरुषकारप्राबल्यप्रतिपादनसन्दर्भाः

रामस्य वनवासनिर्णयसन्दर्भे यदा रामः वनवासकारणं न कैकेयी न वा दशरथः किन्तु दैवमेवेति निष्कर्षति तदा लक्ष्मणः रामस्य दैवप्राबल्यवादं निरा- करोति । तस्याभिप्रायस्त्वित्थम्- कैकेयी दशरथश्च स्वस्वार्थसाधनाय अस्मान् वञ्चयितुमेव एतादृशव्यवहारे प्रवृत्तौ । अतः अनयोः निग्रहमेव उचितम् । अहमेव निग्रहं कृत्वा अभिषेकाय अनन्तरायं सादयामि । अत्र पराक्रमः पुरुषकार एव साधु न तु दैववादः । दैववादस्तु दुर्बलानां निर्वीर्याणां, न तु क्षत्रियाणां वीर्यवताम-विक्लवानाम् । अतः यः कोऽपि पराक्रमी न दैवं पर्युपासते । यः पुरुषकारेण दैवं प्रबाधितुं समर्थः सः दैवेन विपन्नार्थोऽपि नावसीदतीति । तथा हि- विक्लवो वीर्यहीनो यः स दैवमनुवर्तते । वीराः सम्भावितात्मानो न दैवं पर्युपासते ॥ दैवं पुरुषकारेण यः समर्थः प्रबाधितुम् । न दैवेन विपन्नार्थः पुरुषः सोऽवसीदति- रामा . २.२३.१६,१७ ॥ वीर्यवन्तः दैवमतिक्रम्य स्वसामर्थ्यबलात् दैवं निवार्य कार्यं साध- यन्ति । अतः उपेक्ष्यतां दैवम् । त्वद्विदेनासम्भ्रान्तेन नैवं दैवप्राबल्यं वक्तु- मुचितम् । अद्य तु यौवराज्याभिषेकान्तरायरूपं दैवं मत्पौरुषहतं जना द्रक्ष्यन्ति", इत्याद्येवं लक्ष्मणाक्रोशः । अस्यायमाशयः - यत् दैवप्रेरणया तयोरियमाकूतिश्चेत् न तयोर्निजाशयः तवारण्यगमनम् । यदि तथा तर्हि त्वया वनगमनं निराक्रियते चेत्तदपि अनयोराग्रहोल्लङ्घनदोषो न सम्भवति । अवशिष्टं च दैवविषयः। स तु मया पुरुषकारेण परिहार्यते ।

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XIV : July to December – 2019

# श्रीमद्रामायणानुसारेण दैवपुरुषकारयोः प्राबल्यदौर्बल्यसमीक्षा

विद्वान् गुरुप्रसादः (मैसूरु)*

## पीठिका -

अनियतसुखदुःखेभ्यो नित्यमुद्विजते लोकः । नियतसुखं तु केषाञ्चन जीवन्मुक्तानां योगिनामेव । सामान्यास्तु अनित्ये नित्यभ्रमेण च नित्यं भ्रमन्ति । नियमेन अनियतसुखदुःखपङ्के च निमज्जन्ति । किं सुखदुःखमूलम् ? धर्माधर्मौ । पुरुषः इहोपात्तजन्मनि पूर्वकर्मानुगुणं सुखदुःखफलमुपभुङ्क्ते । अपि च जन्मान्तरकारणं तु पूर्वकर्मफलमिति ।

स्थिते चैवमत्रेयं जिज्ञासा- यदिह जन्म किमुपभुज्यमानेन पूर्वकर्मणा दैवेन नियन्त्रितमुत प्रकृतजन्मनि स्वातन्त्र्येण क्रियमाणपुरुषकार-नियन्त्रितमिति । अत्र शास्त्राकाराः विप्रतिपद्यन्ते । केचन इह जन्म दैवेनैव नियन्त्रितमिति । अन्ये केचन पुरुषकारनियन्त्रितमिति । उभयनियन्त्रितमिति चापरे । नियन्त्रितमिति किम् ? प्रबलमिति । इहजन्मनि दैवस्यैव प्राबल्यं न तु पुरुषकारस्य, न तथा किन्तु पुरुषकारस्यैव प्राबल्यमित्याद्येवं शास्त्रेषु शास्त्रकारेषु चेतिहासपुराणेष्व- भिप्राया भिद्यन्ते । महाभारते विद्यमानं द्रौपदीवचनमिदं दृढयति । तथा हि- सर्वमेव हठेनैके दैवेनैके वदन्त्युत । पुंसः प्रयत्नजः केचित्त्रैधमेतन्निरुच्यते । न चैतावता कार्यमन्यन्त इति चापरे ॥ म.भा.**3.32.32.** इत्यादि ।

एवञ्च नायं वादोऽर्वाचीनः । रामायणेप्ययमेव विषयः तत्र तत्र श्रीरामा- दिभिः प्रतिपादितः । श्रीरामेणोक्तः त्रिंशच्छलोकात्मकः दैवप्राबल्यनामकः सर्ग- विशेषः काव्ये उपलभ्यते । तदनु पुरुषकारप्राबल्यप्रतिपादकः लक्ष्मणोद्घोषात्मकः लक्ष्मणक्रोध इत्ययं सर्गोप्युपलभ्यते । अन्यत्र च श्रीरामं प्रति कृतोपदेशात्मकः वाल्मीकिविरचित इति प्रथितः योगवासिष्ठनामको ग्रन्थविशेषो वरीवर्ति यश्च सर्वात्मना दैवनिराकरणात्मकः पुरुषकारस्यैव प्राबल्यप्रतिपादकः । अतः संशीतिः सुखदुःखमये जीवने किं दैवस्य प्राबल्यम् अथवा पुरुषकारस्य उत उभयस्यापीति । एतादृशसंशयविषयस्तावदवश्यं विवेचनीय इतीदमेव सन्दृभ्य विविच्यते । प्रधानतयात्र रामायणमधिकृत्य इति विशेषः ।

### श्रीमद्रारामायणम्

भारतीयविद्यासम्प्रदाये रामायणस्य स्थानमद्वितीयम् । काव्यसम्प्रदाये आद्यं काव्यमित्यस्य वैशिष्ठ्यम् । अस्य कर्ता वाल्मीकिरप्यादिकविरिति प्रतिष्ठामवाप । काव्यमिदमैतिहासिकम् । चतुर्षु युगेषु द्वितीययुगे त्रेतानामके सीतारामौ दम्पती भूमाववततारतुः । स्वजीवनविधानेन लोकोद्धारमार्गं दर्शयामा-सतुः । तयोरुभयोरयनमधिकृत्य कृतं काव्यं रामायणम् - रामा.१.४.७ |

### दैवपदार्थः

देवान्नियतादागतमित्यर्थे अणि दैवम् । दैवमिति विविधार्थेषु विद्यमानं पदम् । देवता, देवसम्बन्धि इत्याद्यर्थाश्च प्रसिद्धाः । तथा हि- वैश्वदेवादिकं दैवं कर्म । ह .भ.सा. ९.२८९ । दैवो होमेन यज्ञः स्याद्धौतस्तु बलिदानतः ॥ ह .भ.सा. ९.२९० ॥ एवं सत्यपि प्रकृते पूर्वजन्मकृतकर्मणि यद्दैवपदं परिभाषितं तदत्र इष्टम् । तथा च वाचस्पत्यम्- भाग्ये फलोन्मुखे शुभाशुभकर्मणि दैवमिति । शब्दार्थचिन्तामणौ हि पूर्वं कर्म तदित्युक्तम् । प्राग्जन्मनि कृतं कर्म शुभं वा यदि वा शुभम् । दैवशब्देन निर्दिष्टं इह जन्मनि तद्बुधैः ॥ श.चिं. । अमरकारस्तु दैवस्य पर्यायमाकलयन्नाह- दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः अ.को.१.४.१५७ इति | कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु इति निघण्टुः । पूर्व- जन्मकृतं कर्म तद्दैवमिति कथ्यते - सु .र.भा-सा.प्र.उ. प्र.१० । (हि.प्र) । एवञ्चाहत्य दैवं हि पूर्वजन्मकृतशुभाशुभकर्मणि व्यवस्थितमित्यत्र न काप्यनुपपत्तिः ।

### पुरुषकारपदार्थः

पुरुष कृ भावे घञि पुरुषकारः । पुम्भावे तत्क्रियायां च पौरुषम् । इत्यमरः ३.३ । पुरुषस्य चेष्टायां पौरुषे इति शब्दार्थचिन्तामणिः । पुरुषस्य कारः करणं पुरुषस्य कृतिर्वा पुरुषकार इति शब्दकल्पद्रमः । पुरुषचेष्टिते पौरुषे इति वाचस्पत्यम् । पूर्णप्रयत्नः पुरुषकार इति चाणक्यनीतिसूत्रटिप्पणी । एवञ्च अपेक्षितफलार्थंविधीयमानो यत्नः पुरुषप्रयत्नः पुरुषकारः ।

### विषयप्रव्रेशः - दैवप्राबल्यप्रतिपादनसन्दर्भाः

दशरथोऽयोध्याधिपतिः । कौसल्यादयस्तिस्रो भार्याः । श्रीरामादयश्च- त्वारो औरसाः । रामोऽग्रजः । सीता भार्या । वृद्धो दशरथः श्रीरामं यौवराज्येन सं- योक्तुमैच्छत् । तदुदघोषयच्च । तदा मन्थरया सुप्रचोदिता अन्यतमा भार्या कैकेयी



दशरथेन लब्धपूर्वेण वरेण चतुर्दशमासमितं श्रीरामवनवासम् अपरेण भरताभिषेकं च वरयामास । पट्टाभिषेचने उद्युक्तः श्रीरामः वनगमनमनुमतः । तत्र रामो लक्ष्मणं वदति- सौमित्रे ! “यौवराज्याभिषेकार्थं त्वया ससम्भ्रमं सकलाः सामग्रीः साधिताः परमिदानीं ता एव सामग्रीः अभिषेकान्निवृत्यर्थं साधनीयमिति” रामा.२.२२.५. इति । परमनेन निर्णयेन सङ्क्रुद्धो लक्ष्मणस्तु राममाह कथञ्चित् राजा भवानेव भवत्विति । लक्ष्मणाभिमतमभिजानन् रामः पुनः वदति- यः मामरण्यं प्रोषितुं मन्थराद्वारा कैकेयीं निर्ममन्थ यश्चास्मिन्नेव विषये मम मनः स्थिरं चकार तं च मां च सङ्क्लेष्टुं नेच्छामि - रामा .२.२२.१४. इति । अत्र तु “तं तु नार्हामि सङ्क्लेष्टुम्” इत्यस्य व्याख्यानं अन्यथा प्रादर्शि यत् “येन विधात्रा मन्थराद्वारा कैकेयीं निमित्तीकृत्य मत्प्रवासनं निश्चितं तस्य नियममुल्लङ्घयितुं नाहमर्हः, नाम विधातृनियमस्त्वनुल्लङ्घनीयः किन्तु यथाश्रुतं पालनीयः, तदेव मत्कर्तव्यम्” इति । उभयथापि गम्यते यत् यश्चारण्यवासः पूर्वनिश्चितः स च केनापि पुरुषकारेणानुल्लङ्घनीय इत्येतद्धि राममतमिति । अनेनात्र श्रीरामः प्रायः पर्यायेण दैवप्राबल्यस्य समर्थने एव स्थितः । एतदग्रे उक्ते रामवचने दैवप्राबल्यं दर्शयति व्याख्याता गोविन्दराजोऽनया सङ्गत्या, तथा हि- “पूर्वसर्गे धर्मोऽस्तीत्युक्तम् । अधुना प्रसङ्गात् धर्मातिरिक्तं दैवं किञ्चिदस्ति फलप्रदमिति दर्शयन् मत्प्रवासे न कैकेयी निमित्तम् । सा न निन्दितव्येत्याह कृतान्त इत्यादिना” इति । तत्र रामोक्तिर्यथा- लक्ष्मण ! महाराजेन यस्मिन् दिने मह्यं राज्यं प्रदातव्यमिति यः निश्चयः कृतः तद्दिने एव यौवराज्या धिकाराद्विच्युतिः किञ्च च वनवासोऽपि समापतितः । एतादृशः मनसाप्यचिन्तितो व्यवहारः दैवायत्त एव न त्वन्यः । यतः कैकेय्यामावयोः (रामभरतयोः) तरतमभावाभावेऽपि (रामा.२.८.३५, २.८.१४) कैकेय्या रामस्य विषये एतादृशवरयाचनं नास्याः स्वभावसम्भवम् । तथापि तया एवं पृष्टं चेत्तत्र दैवस्यैव हेतुत्वं मन्तव्यं न तु कैकेयी कारणमिति दैवप्राबल्यमेव तर्कयति - रामा.२.२२.१५ । तदनु “दैवं हि मानवैरचिन्त्यप्रभावं निश्चयेन च फलप्रदानस्वभावमित्यत्र न संशयलेशोऽपि । अत एव आवयोर्विपर्ययः समपद्यत इत्यनेन श्रीरामः किन्नाम दैवमित्येव स्पष्टयति । तथा हि- यदचिन्त्यं तद्दैवं भूतेष्वपि न हन्यते - रामा.२.२२.२० इति ॥ अपि च विधेर्विलासोऽचिन्त्यः यश्च कार्यात्परमेव दृश्यते । तादृशं दैवं को नाम निवारयितुं शक्नुयात् इति । तदनु रामः दैवस्य कर्म कीदृगिति स्पष्टयति -

अपि स्वपुरुषप्रयत्ने सफल एवाभवदिति । एवमेव अन्यथापि वक्तुं शक्यते यत् दुर्योधनस्य साफल्ये धर्मराजस्य दुर्विधिरेव कारणमिति । रामायणप्रसङ्गेऽपि तथा-दशरथस्य कौसल्यादीनां च दुर्दैवं , वालिरावणादीनां दुष्कर्म, देव-ऋषिवरप्रभावः, कबन्धाहल्यादीनां शापविमोचनानुकूलः कर्मविशेषः, शबरीशरभङ्गादीनां शुभकर्म-विशेष इत्यादयः सन्दर्भाः रामस्यारण्यवासादिकष्टपरम्परायां निमित्तमिति ।

आहत्य विचार्यमाणे दैवपुरुषकारप्राबल्यसमर्थकशास्त्राणां सन्दर्भो नैकः । तेषु तावन्मिथो वैषम्यम् । विषयेऽस्मिन् लोकेऽपि एवमेव अनेकेषामनुभवं प्रवचनं च भूरि भूरि शुश्रुम । अतः उभयपराणि वाक्यानि यद्यपि समाधातुं युक्तानीव भासन्ते । तथापि रामादीनां वसिष्ठादीनां मत्स्यवचनादीनां वा भवतु न तेषां वादं वयं तिरस्कर्तुं पारयामः । रामवचनानुसारमुच्यते चेत् दैवस्यैव प्राबल्यं स्वी- कर्तव्यम् । वसिष्ठानुगुणमुच्यते चेत् पुरुषकारस्यैव प्राधान्यं वक्तव्यम् । चाण- क्यादीनां याज्ञवल्क्यादीनां च वादस्वीकारे तूभयोस्समर्थनमवश्यं भाव्यम् । यद्येवं तदा राममत्स्यवसिष्ठवचनानामयुक्तत्वमवश्यमङ्गीकर्तव्यम् । परं तदयुक्तम् । किन्त्विदमवधेयम् यत् दैवपुरुषकारविषयः रामादिभिः समर्थितः क्वचिच्च निरा-कृतः । परन्तु सीतारामयोस्तु विष्णुलक्ष्म्योरवतार इति निश्चप्रचम् । तौ तु तत्र तत्र विद्यमानविषयमधिकृत्य दैवप्राबल्यं पुरुषकारप्राबल्यं वा समर्थयेताम् । किन्तु दैवं पुरुषकारश्च सामान्यानां मनुष्याणां विषयः न तु पूर्वकर्माभावानामवतार-विग्रहाणामन्वीयमानो विषय इति ।

## चिन्तनफलं साम्प्रतमुपयोगञ्च

दैवपुरुषकारयोः प्राबल्यदौर्बल्यवादः नायमर्वाचीनः । रामलक्ष्मणयोरेव तादृशो वादः प्रवृत्तश्चेत् तत्कालेऽपि दैवपुरुषप्राबल्यदौर्बल्यविषये विवादोऽऽसीदिति तु निर्विवादः । अत एव इदानीमपि तस्य विचारः प्रस्तुतः । येन विवेकेन लोकानां भाविजीवननिर्वाहाय दिग्दर्शनं स्यात् ।

किञ्च न केवलं धर्मार्थकामाः शास्त्रैरुपदिष्टाः । किन्तु अन्तिमोऽपवर्गः परमपुरुषार्थत्वेनोपदिष्टः । अतः स मानवैस्साधनीय एव । यद्यपि शरीरमनुल्क्ष्य प्रवृत्तोऽप्यायुर्वेदः इदमेव द्रढयति -

अनामयत्वं च आत्मानं मन्यमानस्यैव - आ.वे.सू.१.१२ इति । अतः सोऽनिवार्यः । एवञ्च तत्काले यथासाध्यं निर्णयाविष्करणमवश्यम् ।



अतोऽद्य अरण्यवासं सन्त्यज्य भवानेव राजा भवतु । न तावन्मात्रं , राजा भवत्वेव इति ।

एवं लक्ष्मणः वीरावेषेणाहमेव दैवमतिवर्त्य उपतिष्ठामीति प्रतिज्ञाय दैवप्राबल्यवादः दुर्बलानामेवेति प्रतिपाद्य रामस्य वादं खण्डयति । यद्यपि रामः तस्य वादमनिराकुर्वन्नपि दैवमेवाश्रयति, लक्ष्मणोऽपि राममेवानुसरतीत्यन्यो विचारः । स चिन्त्यः । तत्समीक्षायामीक्षामः । एवमेव रामायणेऽन्यत्रापि पुरुष-कारविषयः सन्दर्भविशेषे कैश्चित्तत्र तत्र प्रकटितो वर्तते । अत्र तु विस्तरभयान्नो- पस्थाप्यते । प्रधानतया उभयोरपि वादयोरयमेव वनवासनिर्णयसन्दर्भोऽलं विषय- विमर्शनार्थम् । रामाद्युक्ताभिप्रायसमर्थनार्थं शास्त्रान्तरेषु प्रमाणान्तरप्रदर्शनम् ।

## तत्र दैवप्राबल्यसमर्थनम्

आत्मोपनिषदि उच्यते- दैवेन नीयते देहः तथा कालोपभुक्तिषु- आत्मो. १९. इति । ब्रह्माण्डपुराणे अपि सर्वं दैवायत्तमिति । यथा- दैवाधीनं जगत्सर्वं जन्मकर्म शुभाशुभम् । संयोगाच्च वियोगाच्च न च दैवात्परं बलम् - ब्र .वै.पु.ग.खं इति दैवप्राबल्यं स्पष्टमुद्घुष्टम् । तत्र दैवचिन्तनमित्यपरपर्याये ज्यौतिषे शास्त्रे पुनर्जन्म प्रायः पूर्वकर्मभोक्तुमेवेति साकूतमुक्तम् - स्वकर्मभोक्तुं जायन्ते प्रायेणैव हि जन्तवः । क्षीणे कर्मणि चान्यत्र पुनर्गच्छन्ति देहिनः - प्र.मा -१.३५. इति । अथ पौरुषातिशयेन कथञ्चिदपि जीवं रक्षणीयमिति चिकित्सां विधीयमाने आयुर्वेदेऽप्यन्ते दैवपरत्वनिर्णय एव दृश्यते । वैद्यस्तु आयुषः प्रभुरिव चिकित्सां कुर्यात् । किन्तु न कदापि सः प्रभुरिति जानीयात् । आयुर्हि रोगिनः दैवायत्त-मिति । तथा हि- न वैद्यः प्रभुरायुषः - यो.र.१ .९. इति । एवञ्च स्पष्ट- मायुर्वेदेनाप्यन्ते दैवमेवशरणमिति । तत्र राजनीतिविचक्षणश्चाणक्यो बहुविध- पुरुषकारेण नन्दान् निवार्य चन्द्रगुप्तं प्रतिष्ठापयामास यः सोऽपि दैवप्राबल्यं प्राह - दैवं विनाऽतिप्रयत्नं यत्करोति तद्विफलम्- चा.नी.२.१९.। दैवहीनं कार्यं सुसाधमपि दुस्साधं भवति - चा .नी.२.१९. इति ।

## पुरुषकारसमर्थकानि शास्त्राणि

यथा दैवप्राबल्यं प्रतिपादयन्ति शास्त्राणि तथैव पुरुषकारप्राबल्यमपि वर्णयन्ति । योगवासिष्ठनामको ग्रन्थः सर्वात्मना दैवं तिरस्कृत्य पुरुषकारपारम्यं स्थापयति । तत्र दैवं विचिन्त्य प्रतिकर्तुमेव उपायं चिन्तयति ज्यौतिषम् यच्च

विशिष्य दैवे प्राधान्येन प्रमाणतामाप्नोति । ज्योतिर्विदो हि दैवज्ञशब्देनैव व्यपदिश्यन्ते । शास्त्रं च कर्मविभागमुक्त्वा पुराकर्म कीदृषेण प्रतिकर्मणा परिहर्तुं शक्यमिति चिन्तयितुमेव प्रवृत्तम् (प्र.मा.१.३३-४२)।

अथायुर्वेदोऽपि पुरुषकारेण दैवं परिहर्तुं दिग् दर्शयति- पूर्वजन्मार्जितं कर्म व्याधिरूपेण बाधते । तच्छान्तिरौषधैर्दानैर्जपहोमसुरार्चनैः - यो .र.१.८. इति । तत्र चाणक्योप्याह- कार्यं पुरुषकारेण लक्ष्यं सम्पाद्यते - चा .नी.सू.२.५ । एवञ्च एतादृशशास्त्रवाक्यानि पुरुषकारपराणि प्रभूतमुपलभ्यन्ते ।

### दैवपौरुषोभयसमर्थनम्

एवं सत्यपि उभयपराण्यपि नाल्पानि । तथाहि बृहत्पराशरस्मृतौ- दैवपौरुषसंयोगैः सर्वास्सिध्यन्ति सिद्धयः । नैकेन चक्रेण रथः प्रयाति न चैकपक्षो दिवि याति पक्षी । एवं हि दैवेन न केवलेन पुंसोऽर्थसिद्धिर्नरका ऋते वै ॥ केचिद्धि दैवस्य न केवलस्य प्राधान्यमिच्छन्ति मतिप्रणीताः - बृ .प.१०.६६,६७ । इत्यादि । अत्र हि रथस्य विहायसस्य च उदाहरणेन बहुस्पष्टं प्रतिपादितं न केवलं पौरुषात्कार्यसिद्धिः न वा दैवादेवेति । योगी याज्ञवल्क्योऽपि इदमेव प्रमाणयति- केचिद्दैवात्स्वभावाद्वा कालात्पुरुषकारतः । संयोगे केचिदिच्छन्ति फलं कुशल- बुद्धयः ॥ यथा- ह्येकेन चक्रेण रथस्य न गतिर्भवेत् । एवं पुरुषकारेण विना दैवं न सिद्ध्यति- या.स्मृ.१.३५०,३५१. इति । तत्रैव मिताक्षरायामेवमुक्तं- यत् फलप्राप्तिः न केवलं दैवे व्यवस्थिता । अपि तु पुरुषकारेऽपि , लोके तथा दर्शनात् । चिकित्सादि शास्त्रवैय्यर्थ्यापत्तेश्च - या.स्मृ.मिताक्षरा इति । तत्र चाणक्येनापि- पुरुषकारमनुवर्तते दैवम् । न दैवमात्रप्रमाणानां सिद्धिः - चा .नी.२.६,३७ इत्युक्तम् । अतः शास्त्रकाराः केचन दैवपुरुषकारावुभावपि फलसाधने प्रमाणभूताविति मन्वाना दृश्यन्ते । अतः द्वयोरपि स्थानं सामान्यं वर्तते इति भाति ।

## अथ समीक्षा

अथात्र रामायणे दैवपुरुषकारविषये विद्यमानानभिप्रायान् सङ्गृह्य समीक्षा लक्षिता । तथा अन्येभ्योऽपि शास्त्रेभ्यो पुराणेभ्यश्च प्रमाणभूतान्युपष्टम्भकतयाऽऽलम्बितानि । विषयेऽस्मिन् यथोक्तं- पिण्डे पिण्डे मतिर्भिन्ना इति तथा शास्त्रेषु शास्त्रेषु पुराणेषु पुराणेषु च अभिप्राया भिद्यन्ते । केचन दैवस्यैव प्राबल्यमित्यपरे पुरुषकारस्यैव इत्युभयपराश्चान्ये ।



श्रूयते हि नैको मुनिर्यस्य मतं प्रमाणमिति भणितिर्नैयमर्वाचीना । अत्र त्वस्मिन् विषये यथावकाशं समीक्षा साक्षात्कृता । त्रेतायामेव दैवपुरुषकारविषये रामलक्ष्मणयोः तादृशो वादः संवृत्तश्चेत् तत्कालेऽपि दैवपौरुषयोः प्राबल्यदौर्बल्यविषये विवादोऽऽसीदित्यत्र तु न विवादः । अतः विषयेऽस्मिन् तत्त्वबुभुत्सुकता नानपेक्षिता । तदत्र प्रकृता ।

रामायणे वनवासनिर्णयसन्दर्भः । स च तत्र सर्वात्मनाऽनिरीक्षितः । अत्र सन्दर्भः सर्वोऽपि दैवप्रेरित एव न तु कैकेय्या दशरथेन वा कृतापराधिक इति रामाभिप्रायः । तत्र दैवं किमित्यपि तेन सन्दर्भानुगुणमुक्तम् । तथा हि- यदचिन्त्यं तु तद्दैवं भूतेष्वपि न हन्यते इति । किन्तु क्रोधसमाकुलो लक्ष्मणः वादमिदं निराकुर्वन् पौरुषवादं पुरस्करोति । दैवं भूतेष्वपि न हन्यते इति राम- वादः । दैवं पुरुषकारेण प्रबाधितुं शक्यते, न शक्यते इति तु निर्वीर्याणामिति लक्ष्मणवादः । न तत्र लक्ष्मणवादोऽप्रामाणिकः । यतः शास्त्रेषु पुरुष- कारप्राधान्यमुक्तम् । अतो लक्ष्मणवादः न तिरस्कारयोग्यः । ननु सोऽन्ते रामवादमेवाङ्गीकुरुते इति चेत्सत्यम्, परं न तावता स रामवादमेव परमार्थं मनुते । स्वभावतो रामकिङ्करः स किं कुर्यात् । न खलु रामरेखातिक्रमणं कदापि तेन कृतम् । रामकैङ्कर्ये एव परमार्थतां प्ररिगृहीतस्य तस्य स्वत्वाभावाद्रामपक्ष एव स्वपक्षत्वेन स्वीकारः स्वभावः । किङ्करत्वभावापन्नस्य युक्तमेवैतत्खलु । एवमपि रामेण तत्सन्दर्भे यो दैवप्राबल्यवादः स्थापितः स सान्दर्भिक इत्यपि वक्तव्यः । यतः न तेन कृतं लक्ष्मणोक्तपौरुषवादस्य खण्डनम् । अपि च पितृवाक्यपरिपालनतत्परो रामः दैवं व्याजेनोपयुज्यते इति भाति । कुतः ? यदि स दैवमेव मनुते तर्हि कुतो न सीतापहारस्यापि दैवं मनुते । कुतो तत्र त्रिलोकमपि नाशयामीति चुक्रोष इति प्रश्नः समुदेति । अतः रामोक्तो दैववादः सान्दर्भिकः । स विचिन्त्यः । किञ्च इदमपि सत्यं यदत्र दैवप्राबल्यं चेदपि नेदमभिमतं यदन्येषु सर्वेषु सन्दर्भेषु सम्पत्स्यमानानां समेषां कारणं दैवमिति । अन्यत्र विरोधापत्तेः । अथापि यदि दैवं स सिद्धान्तत्वेनादृतः तर्हि प्रधानतमेष्वन्येषु सन्दर्भेष्वपि तत् दृश्येत । न हि तद् दृश्यते ।

### इदं निष्पन्नम्

तत्र च महाभारते द्यूतप्रसङ्गो विश्लिष्यते चेदेवं भवति- अनेकवारं पाण्डवनाशाय कृतप्रयत्नोऽपि हतप्रयत्न एव जातो दर्योधनोऽन्ते सकितवव्यवहारेण

नाव्यमिदं 'रूपम्' 'रूपकम्' इति च कथयन्ति । तदुक्तं– "रूपं दृश्यतयोच्यते" "रूपकं तत्समारोपात्" इति । नाव्यं तु नृत्यस्य विस्तृतरूपम् । नाव्ये गद्यप्रवेशेन सम्भाषणस्य कथायाः वृद्धये आनुकूल्यं वर्तते । नृत्य–गीतवाद्यादिभिः नाटकस्य विशेषकान्तिः लभ्यते । नाटकं यदि गीतमयं भवति तदा तत् गीतनाटकम् इति कथ्यते । अत्र गीतैः सह नाव्यम् अपि भवति ।

पूर्वं नृत्यगीतानि सम्मील्य एतेषाम् अभिनयः क्रियते स्म । कानिचन संस्कृतनाटकानि चम्पूकाव्यानि इव वर्तन्ते । दीर्घसमासभूयिष्ठानि पद्यमयानि च इमानि बृहन्ति नाटकानि प्रदर्शनापेक्षया पठनार्थमेव लिखितानि इव भासन्ते । भरतमुनिः नाव्यशास्त्रे नाव्यांशान् विस्तरेण प्रस्थापयति । नाव्यशास्त्रस्य कारिकायां नाव्यांशानां सङ्ग्रहः वर्तते ।

रसा भावा ह्यभिनयाः धर्मिवृत्तिप्रवृत्तयः ।
चतुर्मुखोऽथवा ब्रह्मा विदुर्नान्ये मादृशाः ॥" इति ।

**अभिज्ञानशाकुन्तले रसनिरूपणं रसविमर्शश्च :**

**Picturistion and Critical Study of Rasa in Abhijnana Shakuntalam :**

रस्यते आस्वाद्यते रसादिः इति रसः । तादृशः रसः नव । रसादिः इति कथनात् रसाभासभावभावाभासादयोऽपि गृह्यन्ते । रसाभासादयोऽपि गौणेन रसशब्देन व्यपदिशति हि । रसनधर्मयोगात् । रसापेक्षया उक्तभावादयः प्रधाना भवन्ति तर्हि ते भावध्वनिरिति आहूयन्ते । एवं काव्येषु रसप्रवाहः भवेत् । प्रस्तुते अभिज्ञानशाकुन्तले नाटके रसः तत्पोषकगुणालङ्कारीतयः विद्यन्ते । एवं काव्यगुणसम्पन्ने नाटकेऽस्मिन् रसविषयं विमृशामः ।

नाटकलक्षणे मुख्यरसः शृङ्गारो वीरो वा भवेत् अन्ये हासादयो अङ्गाः भवेयुः इति नियमो अस्ति । तद्वत् अस्मिन् शाकुन्तले शृङ्गारः प्रधानः भवति शाकुन्तले रसचिन्तनं प्रस्तुतं वर्तते । नाटकं ख्यातवृत्तं स्यात् इत्यादि नाटक–लक्षणमत्र अभिज्ञानशाकुन्तले समन्वीयते इति तत् नाटकमिति सिद्ध्यति । रसविषये नाटकलक्षणो इदमुक्तम्–

एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।



अस्मिन् विषये लोकसामान्यानां तु किङ्कर्तव्यविमूढता । दिनं प्रति सुखं मृग्यते लोकः । तदर्थं परितप्यते । तथा हि महेश्वरवचनम् -

शुभानामशुभानां च कर्मणां फलसञ्चये ।
विपाकज्ञाश्च ये देवि ते नरा स्वर्गगामिनः ॥ म .भा.११.१४४.३८ इति ॥

अतो वचनमीश्वरीयमवधार्यते चेदभीप्सितसुखमन्विष्यमाणानामतितरामु-पकुर्यादिदं चिन्तनमिति सङ्क्षेपः ।

विद्वान् गुरुप्रसादः
शोधच्छात्रः
कर्नाटकसंस्कृतविश्वविद्यालयः
चामराजपेटे–560018
बेङ्गळूरु, कर्नाटक
चरदूरवाणी : 9481818394
E-mail : guruprasaada@gmail.com

* (विद्वान् गुरुप्रसाद महोदयः मैसूरुमहानगरे विद्यमानायाः श्रीमन्महाराज संस्कृतमहापाठशालायाः नवीनन्यायविभागस्य सहायकप्राध्यापकानां डा. एम्. ए. आळ्वार् महाभागानां मार्गदर्शनेन "श्रीमद्रामायणानुसारेण दैवपुरुषकारयोः प्राबल्यदौर्बल्यसमीक्षा" इत्यस्मिन् विषये बेङ्गळूरुमहानगरस्थे कर्नाटक संस्कृत विश्वविद्यालये संशोधनकर्मणि रतः ।)

***********

**Journal of Veda Samskrita Academy**
**ISSN 2250-1711**
**Volume XIV : July to December – 2019**

# कालिदासप्रणीत–अभिज्ञानशाकुन्तले काव्यरसतत्वविमर्शः

हेमराजः एन्. एस्. (बेङ्गळूरु)*

'भारतस्य द्वे प्रतिष्ठे संस्कृतं संस्कृतिस्तथा' इति संस्तूयमाना असौ संस्कृतभाषा अस्माकं भारतदेशस्य प्रतिष्ठात्वेन मन्यते । अनितरसाधारणायाः सुरवाण्याः अस्याः साहित्यम् अपारम् अनुपमं च वर्तते । संस्कृतसाहित्ये प्राधान्येन वैदिकसहित्यं लौकिकसाहित्यम् इति भेदद्वयं दृश्यते । लौकिक–साहित्ये काव्यसाहित्यं शास्त्रसाहित्यम् इति पुनः भेदः वर्तते । काव्यशास्त्रयोः उपायभेदे सत्यपि उद्देश्यभेदः नास्ति । धर्मार्थकाममोक्षाणां पुरुषार्थानां परिचयः लाभश्च संस्कृतसाहित्यस्य उद्देश्यम् । काव्यसाहित्यं तु विशालं सत् विपुलानां नानाप्रकाराणां काव्यानाम् आश्रयस्थानं भूत्वा सहृदयानां जनानां मनांसि आकर्षयति । काव्यानि कान्ता इव आत्यन्तिकप्रीत्या अनुनयेन च जनान् सन्मार्गे प्रवर्तयन्ति इष्टार्थं च प्रापयन्ति इति हेतोः एतेषां कान्तासम्मितम् इति अभिधानम् ।

संस्कृतसाहित्यस्य प्रधानाङ्गभूते दृश्यकाव्यसाहित्ये अन्यतमः प्रकारः रूपकसाहित्यम् अत्र अध्ययनविषयस्य प्रसङ्गावधानात् ईषत् विव्रियते ।

आनन्दनिस्यन्दीनि रूपकाणि साहित्यप्रपञ्चस्य अपूर्वरमणीयं योगदानम् । साहित्यमञ्जर्याम् अभिनवं सुगन्धयुक्तं कुसुमं तु रूपकमेव इति मन्यते । अस्मिन् संस्कृतसाहित्ये सङ्गीतं, साहित्यम्, अभिनयः इत्यादयः ललितकलाः सामञ्जस्येन सम्मिलन्ति । रूपकाणि आपण्डितपामरम् अनि– र्वचनीयम् आनन्दम् उत्पादयन्ति । कल्पनाविलासैः भाववैभवैः सुमनोहर– सन्निवेशैः च सहृदयानां हृदयाणि रङ्गस्थलम् इव परिवर्तयति रूपकम् । मानवानां रागद्वेषमदमात्सर्यादिगुणानां परिवर्तनं हृदयावर्जकरीत्या सम्प्रदर्श्य रससुधां समुत्पाद्य चित्तं संशोध्य स्वार्थात् निस्स्वार्थं प्रति नीयमाना दिव्या कला एव रूपकम् । यद्यपि नाटकं रूपकप्रभेदे अन्यतमं सदपि अर्थभेदे स्वरूपभेदे च सत्यपि सर्वेषां रूपकाणां नाटकमिति सामान्यव्यवहारः आबहोःकालादेव लोके दरीदृश्यते ।



नाटकानां विषये कविरत्नस्य कालिदासस्य वागियं लोकविख्याता । यथा–

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥ इति ।

नाटकानां स्वारस्यसौन्दर्यास्वादनरताः 'काव्येषु नाटकं रम्यम्' 'नाटकान्तं साहित्यम्' 'नाट्यवेदः' इत्यादिभिः वाग्भिः प्राशंसत । भास–कालिदास–भवभूतिप्रमुखाः नाटकानि विरचय्य आचन्द्रार्कं यशोभाजः अभूवन् । यात्रासु उत्सवेषु पर्वसु च रूपकाणि महत्त्वपूर्णं स्थानं भजन्ते स्म । वेदकालादारभ्य अद्यपर्यन्तमपि साहित्यस्य अयं प्रकारः वर्धमानः एव वरी–वर्तते । परमशिवः एव आदिनटः । तस्येयं सृष्टिरेव एकम् अद्भुतं नाटकम् इत्युच्यते । तद्यथा–

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम् ।
आहार्यं चन्द्रतारादि तन्नुमस्सात्विकं शिवम् ॥ इति ।

## नाट्यस्वरूपम् –Nature of Dramas

'नृत्''नट्' इति उभाभ्यां धातुभ्यां निष्पन्ने नृत्ते, नृत्ये नाट्ये नाटके च नर्तनं समानं सदपि एतेषां परस्परं व्यत्यासः समस्ति ।ताललयानुसारि नर्तनम् एव नृत्तम् । तदुक्तं– "नृत्तं ताललयाश्रयम्" इति । नृत्ते भावप्रकाशनम्, अभिनयः, सङ्गीतं वा भवेदेव इति नियमः नास्ति । नृत्ये तु ताललयसमन्वितं सङ्गीतं भवति । अस्मिन् भावाभिनयः प्रमुखः भवति । तदुक्तं– "अन्यद्भावाश्रयं नृत्यं स्यात्" इति । प्रायशः इदं नृत्यम् एकेन एव क्रियते । अस्य सुखदुःखादिभावाः रसत्वेन न परिणमन्ते । नाट्ये अपि नर्तनमस्ति चेदपि 'अवस्थानुकरणं' प्रमुखं भवति । तदुक्तं–'अवस्थानुकृतिर्नाट्यम्' इति । यः इदम् अभिनीते सः नटः । असौ नटः वेषभूषादिभिः व्यक्तिमनुकरोति । असौ इतरेषां पात्राणां साहाय्यं प्राप्नोति । नानादृश्यानि परिकल्प्य व्यक्तेः भावं, वृत्तान्तं च अभिनयति । प्रेक्षकाणां रसभोजनं भोजयति ।

वैखानसं किमनया व्रतमाप्रदानाद्
व्यापाररोधिमदनस्य निषेवितव्यम् ।
अत्यन्तमेव मदिरेक्षणवल्लभाभि–
राहो निवत्सस्यति समं हरिणाङ्गनाभिः ॥

अनया शकुन्तलया मदनस्य व्यापाररोधि मुनिकाव्यकोचितं ब्रह्मचर्यं वैखानसव्रतं विवाहविधिः यथावद् अनुष्ठेयम् किम्? उताहो मदिरेक्षणवल्ल–भाभिः हरिणाङ्गनाभिः समं आमरणं निवत्स्यति किम् ? विवाहविधि ब्रह्मचर्य–मस्या आहोस्वित् किमपि यावज्जीवमेव नैष्ठिकब्रह्मचर्यपूर्वकं स्वसदृशीभिः मृगाङ्गनाभिः सह निवासं करिष्यतीति भावः ।

अयमर्थः अत्र ध्वनितो भवति यत्– यदि एषा कस्मैचित् राज्ञे प्रदेया तदा विवाहपर्यन्तमेव तपोवने स्थास्यति, यदि न कस्मैचित् तपस्विने प्रदेया तर्हि मृगमिथुनवत् कामोपभोगरहिता वने एव स्थास्यति इति । अयं वस्तु–ध्वनिः । अत्र नायकस्य दुष्यन्तस्य शकुन्तला नायिकायाः शकुन्तलायाः दुष्यन्तश्च परस्परमालम्बनविभावः । वनसखीवचननायकनायिकापरस्परदर्शन– श्रवणादीनि उद्दीपनानि, नायके अभिलाषचित्तोद्वेगगुणकथनादिः नायिकायां लज्जाकृतककोपनयकदर्शनाकाङ्क्षा सविलासदिश्च अनुभावाः, द्वयोः नायक–नायिकयोः हर्षोत्साहतर्कलज्जाऽवहित्थादयो व्यभिचारिभावाः, एतैः विभावादिभिः परिपुष्टः रतिस्थायिभावः सामाजिको शृङ्गाररसतामेति । स च सम्भोगशृङ्गारः रतेः नायिकानायकोभयनिष्ठत्त्वात् परस्परदर्शनादिकृतत्वाच्च । अत्र केवलं दुष्यन्तवचने सत्यपि अत्र परस्परर‌तिः प्रकरणवशात् आनुपूर्विकथासञ्चालनात् च अभिव्यज्यते । तस्मात् सम्भोगशृङ्गाररसप्रतिपादने न कापि क्षतिः । पूर्वमत्र वस्तुध्वनिरपि कथितः सोऽपि वस्तुध्वनिः व्यञ्जनया गम्यते ।
प्रथमाङ्के शकुन्तलाविषयकसखीवचनं श्रुत्वा दुष्यन्तस्य स्वगतोक्तिः यथा–

भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्नि तदिहं स्पर्शक्षमं रत्नम् ॥ इति ।

अथ प्रियंवदोक्त्या शकुन्तलाया राजकन्यात्वानुरूपवरप्रदानविषये कुलपतेः कण्वस्य संकल्पं श्रुत्वा तस्मात्परिग्रहयोग्यां निश्चित्य, प्रियशङ्काका–



अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणोऽद्भुतः ॥

शृङ्गारवीरयोः द्वयोः कश्चन एकरसः प्रधानः स्यात् । तौ विहाय अन्ये रसाः अङ्गं भवेयुः । तद्वत् अत्रापि प्रधानरसश्चिन्तनीयः । इह हि शृङ्गाररसः प्रधानः । वीरहासशान्तादयो अङ्गरसाः । अत्र वीरादीनां कस्मिंश्चिदपि अङ्क–प्राधान्यं नास्ति । केषुचित् नाटकेषु अङ्गरसा ये सन्ति ते क्वचित् अङ्केषु प्राधान्यमावहन्ति । किन्तु अत्र तथा कस्मिंश्चित् अङ्के तेषामङ्गरसानां प्राधान्यं न सन्ति । किन्तु तत्र तत्र अङ्कमध्ये अङ्कान्ते वा एते दृश्यन्ते । पूर्णाङ्कव्यापी न कोऽपि अङ्गरसो वर्तते अत्र अभिज्ञानशाकुन्तले । इह नाटके विविधभावाः प्राधान्येन आस्वाद्यतामाप्नुवन्ति । पितरि सुतागतरतिः संख्या सखीगतरतेः शिष्ये गुरुगतरतिः गुरौ शिष्यगतरतिः च व्यज्यते प्राधान्येन तस्मात् तादृशी रतिः भावध्वनिः इति स्वीक्रियते । सोऽपि रसः इति व्यपदिश्यते । अलङ्कारशास्त्रे रसादिरिति पदकुक्षौ रसाभासभावतादृसाभासादयः उक्तत्वात् प्रधानतया व्यज्य–मानो भावोऽपि रसत्वेन व्यवह्रियते ।

एवञ्च भावादयोऽपि प्रधानरसपोषकाः भूत्वा अङ्गानि सन्ति । तेषां भावध्वनिरिति नाम्ना आहूयते शास्त्रकारैः । पूर्वमेव उक्तः प्रधानरसो शृङ्गारो अभिज्ञानशाकुन्तले । स च शृङ्गारः विप्रलम्भः सम्भोगश्चेति द्विधा विभज्यते । इह नाटके सम्भोगशृङ्गारः अङ्गिरसः । स च विप्रलम्भशृङ्गारेण परिपुष्टस्सन् शोभते । एतस्मात् अत्र विप्रलम्भोऽपि आस्वाद्यमानो अस्ति ।

प्रथमाङ्के दुष्यन्तशकुन्तलयोः परस्परदर्शनं सञ्जातम् । तद्द्वारा द्वयोः शृङ्गाराङ्गारो अभवत् इति सम्भोगशृङ्गार इति वदामः ।

द्वितीयाङ्के विप्रलम्भशृङ्गारः विदूषकवचनेषु हास्यरसोऽपि अस्ति ।

तृतीयाङ्के विप्रलम्भशृङ्गारः सम्भोगशृङ्गारश्च विलसति । तत्र तत्र विविधव्यभिचारिभावा अपि ध्वनिपदं यान्ति ।

चतुर्थाङ्के पितृगतरतेः सखीगतरतिश्च प्रधानतया व्याज्यमाना भाव–ध्वनित्वेन व्यवह्रियते । केचन अत्र भ्रमवशात् करुणरस इति वदन्ति । परं तत्असाधुः । पित्रा सुतायाः पतिगृहप्रमाणम् सुतरामिष्यते न तु खिद्यते । तत्स–मये जात दुःखं तात्कालिकं शाश्वदिकं न । शश्वदिके दुःखे करुणरसवासः । पतिगृहप्रेषणावसरे पितृगतसुतविषयकरतिरेव युज्यते इति सः रतिभावध्वनिरिति

मन्येत । लोके न कोऽपि पिता जीवनान्तं सुतायाः पतिगृहप्रेषणं शोचति । एवं च चतुर्थेङ्के करुणरसशङ्का अपास्ता ।

पञ्चमाङ्के न कोऽपि रसः प्रधानतया अभिव्यज्यते । अत्र दुष्यन्त-शार्ङ्गरवयोः वाक्कलहः वर्णितः । अपि च शकुन्तलायाः विषादो वर्णितः । परमत्र अमर्षचिन्ता विषादग्लानिनिर्वेदादि भावाः प्रधानतया अवगम्यन्ते । पञ्चमाङ्के अन्ते अद्भुतरसः आस्वाद्यते ।

षष्ठे अङ्के विप्रलम्भशृङ्गारः प्रधानतया अभिव्यज्यते । तद्विप्रलम्भशृङ्गारं हास्यरसः पोषयति । विदूषकवचने हास्यरसानुभूतिः भवति । वीराद्भुतरस-सम्बन्धिनो विविधभावा अपि तत्र तत्र अनुभूयन्ते ।

सप्तमोऽङ्के दुष्यन्तशकुन्तलयोः समागमो जायते । तस्मात् विप्रलम्भः सम्भोगशृङ्गारे विश्रान्तिं गच्छति । अत्र शृङ्गारेण सह शान्तरसोऽपि दृश्यते । एवमेव वीररससम्बन्धिभावा अपि सन्तीति वयं वदामः । कश्यपमहर्षेः शकुन्तलाविषयकपुत्रिकारतिः राज्ञि महर्षिगतरतिः पुत्रविषयकरतिरित्यादि रतिरेव विवाधालम्बने सहृदयगोचरो भूत्वा रतिभावध्वनित्वेन अनुभूयते ।

अन्तिमाङ्के विविधभावाः दृष्टिपथमायाति । एवमेव समग्रनाटके शृङ्गाररसेन सह विविधभावा प्रधानाप्रधानरूपेण अनुभूयते ।

प्रथमाङ्के दुष्यन्तः शकुन्तलां दृष्ट्वा तत्र वर्तमानयोः सख्योः वचनं च श्रुत्वा तत्सङ्गतिमेवम् आह-

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥

शकुन्तलायाः अधरः किसलयरागयुक्तोऽस्ति । बाहू मृदुशाखानुकारिणौ भवतः । कुसुममिव लोभनीयं यौवनं विजृम्भितं प्रकटितम् तस्याः । सख्या प्रियंवदया पूर्वं उक्तमस्याः लतासादृश्यं युज्यते एव । इति दुष्यन्तस्य आशयः । अत्र नायकस्य दुष्यन्तस्य नायिका शकुन्तला आलम्बनविभावः, उद्यानवन-परिसरनायिकासौन्दर्याणि नायिकाविषयसखीवचनानि च उद्दीपनविभावः, हर्षो-त्साहावहित्थाः व्यभिचारिणः, एतेषां विभावादीनां संयोगात् रतिस्थायिभावः सामाजिके प्रकृष्टोद्बुद्धस्सत् शृङ्गाररसमाप्नोत् ।



अत्र नायिका गुणकथनादिविप्रलम्भस्य उदाहरणं भवति । अत्र उपमालङ्कारः आर्यावृत्तं च उपमालङ्कारं प्रकृतरसं पोषयति । वैदर्भीरीतिः प्रसादगुणं च सहकारिणौ रसास्वादने कर्मणि । पूर्वोक्ताङ्के एव तस्मिन्नेव सन्दर्भे च शकुन्तलारूपं दृष्ट्वा तस्याः परिचयं सखीभ्यां ज्ञातः दुष्यन्तः वर्णयति ताम् । तद्यथा-

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।
न प्रभाततलं ज्योतिरुदेति वसुधातलात् ॥

शकुन्तला अप्सरसम्भवा इति सखीमूलकेन ज्ञायते दुष्यन्तेन । तत्समर्थयन् उपरिवत् वर्णयति । मानुषीषु एतस्य लोकोत्तरसौन्दर्यादि गुणगण-विशिष्टस्य शकुन्तलारूपस्य सम्भवः कथं स्यात्? तादृग् सौन्दर्यं मानुष-स्त्रीजातकन्यासु न दृश्यते इति । प्रभाततलं वसुधातलात् न उदेति खलु यथा प्रकाशः भूमेनोदिति तथेयं शकुन्तला न मनुष्यसम्भवा, अप्सरः सम्भवा एव इति भावः । अत्र नायकस्य दुष्यन्तस्य शकुन्तला आलम्बनविभावः, एवं नायिका शकुन्तलायाः दुष्यन्त आलम्बनविभावः, वनसखीवचननायिकासौन्दर्यं उद्दीपनविभावः, रोमाञ्चाभिलाषनायिकागुणकथन परस्पर्शदर्शनादि अनुभावः, हर्षोत्साहधृतिमतिलज्जादयो व्यभिचारिणो भावाः, एतैः विभावानुभावव्यभिचारि भावैः साधारण्येन व्यापारेण अभिव्यक्तः सामाजिकरतिभावः शृङ्गाररसरूपम् आप्नोति । अत्र दुष्यन्तवचने सत्यपि अत्र परस्पररतिः प्रकरणवशात् ज्ञायते इति कृत्वा परस्परालम्बनविभावत्वम् अस्तीति अयं सम्भोगशृङ्गारः यद्यपि लज्जाव्यभिचारिभावः श्लोकेन नावबुध्यते तथापि श्लोकानुप्रसङ्गात् इति तस्य स्वीकरणमत्र न दोषः । एवं च सम्भोग-शृङ्गाररसप्रतीतौ न कापि हानिरत्र श्लोके । नायिकानायकयोः शकुन्तला-दुष्यन्तयोः परस्परालम्बनविभावत्वं प्रकरणवशात् आनुपूर्विकथासञ्चलनात् च अवगम्यते इति स्पष्टम् । अत्र निदर्शनालङ्कारः अनुष्टुप् छन्दश्च वैदर्भीरीतिः प्रसादगुणश्च रसप्रतीतौ सह-कारिणः । एतत्सर्वं महाकविना औचित्यपूर्णम् उपन्यस्तम् ।

प्रथमाङ्के उक्तप्रसङ्गे शकुन्तलाविषयकं ज्ञातुकामो दुष्यन्तः सखी-मुद्दिश्य कथयति इदम्-

अतः इदं नाटकं सहृदयानन्दोत्पादकं काव्यमिति विदुषां अभिप्रायः ।

**परामर्शितग्रन्थाः**

१. श्रीकृष्णमणिः त्रिपाठी – अभिज्ञानशाकुन्तलस्य विमला–चन्द्रकला–संस्कृतहिन्दीव्याख्यानम्
२. ध्वन्यालोकः आनन्दवर्धनः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९८०
३. साहित्यदर्पणः, विश्वनाथः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९७५
४. काव्यप्रकाशः, मम्मटःचौकम्बा पब्लिकेशन्स्, वाराणसी,२०००
५. अभिज्ञानशाकुन्तलम्, कालिदासः, चौकम्बा पब्लिकेशन्स्, वाराणसी, २००३
६. रामायणम् ट्ट वाल्मीकिमुनिः, परिमलपब्लिकेषन्स्, दिल्ली, १९९१ ।
७. वृत्तरत्नाकरः ट्ट केदारबट्टः, लक्ष्मीवेङ्कटेश्वरप्रेस्, कल्याण, मुम्बई, १८५० ।

**HEMARAJA.N.S**
**Planning Assistant,**
**Karnataka Samskrita University,**
**Chamaraja Pete-560018,**
**Bengaluru, Karnataka**
**E-mail : monihemu85@gmail.com**
**Mobil : 8310719147**

*(हेमराजः एन्. एस्. महाभागः बेङ्गळूरुमहानगरे विराजमानस्य कर्नाटक संस्कृतविश्वविद्यालयस्य हस्तप्रतिशास्त्रविभागस्य विभागाध्यक्षानां डा. विनायक नामण्णनवर् महोदयानां मार्गदर्शनेन “कालिदासप्रणीतरूपकेषु काव्यरसतत्त्व–विश्लेषणम्– एकं विमर्शात्मकम् अध्ययनम्” इत्यस्मिन् विषये कर्नाटक संस्कृतविश्वविद्यालये संशोधनकर्मणि रतः ।)

*******



–कातरं स्वहृदयं सहर्षमेवमाह–

हे हृदय ! सम्प्रति किमियं मद्योग्या न वेति सन्देहो निवृत्तः । अतः त्वं यथेष्टमेवामभिलषा यत् पुरोदृश्यमानं शकुन्तलावस्तुरूपम् अग्निम् आशङ्कसे तदिदं वस्तु स्पर्शक्षमं रत्नमस्ति ।

नेयं ब्राह्मणकन्यका क्षत्रियाप्सरोभ्यां सम्भवा, मत्परिग्रहणयोग्या च इति निश्चयः अभूत् इति भावः ।

अत्र नायकस्य दुष्यन्तस्य नायिका शकुन्तला आलम्बनविभावः, वननायिकासौन्दर्यतद्विषयसखीवचनदर्शनादिः उद्दीपनविभावः, अभिलाषहर्षमति–धृत्युत्साहादयः व्यभिचारिणः, एतैः विभावादिभिः परिपुष्टरतिः सामाजिके शृङ्गार–रसताम् आप्नोति अयं शृङ्गारः सम्भोगः ।

यद्यपि दुष्यन्तस्य स्वगतोक्तौ सत्यमपि नायिकाप्रत्युक्त्यभावे नायि–कायां शकुन्तलायां नायकनिष्ठरतिः प्रकरणवशात् स्वयं तस्याः उपस्थितेः च अभिव्यज्यते इति कृत्वात्र सम्भोगशृङ्गारः । परस्पररतिरूपो स इति ज्ञेयः । अत्र काव्यलिङ्गालङ्कारः जातिः आर्या च ।

प्रथमाङ्के शकुन्तलाविषये दुष्यन्तस्य उक्तिः सखी प्रियंवदाम् । सेयं यथा–

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा–
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुलामूर्धजाः ॥ इति ।

वृक्षाणां सेचवादव्यन्तं परिश्रान्तायाः शकुन्तलायाः परिश्रमलक्षणाति वर्णयति राजा दुष्यन्तः– घटोत्क्षेपणात् अस्याः शकुन्तलायाः बाहू अवनतौ स्तः । करतलौ अत्यन्तं लोहितौ सञ्जातौ । घटोत्क्षेपणादेव प्रमाणेन अधिकः निश्वासवायुः वृक्षसेचनकार्ये अवसितेऽपि स्तनयोः कम्पं जनयति । वदने कर्णाभरणं शिरेषुपुष्परोधि स्वेदजलानां जालकं संस्क्तं दृश्यते । स्वेदजलेन कर्णशिरीषं गण्डस्थले आसक्तं सत् तथा न तरलितं भवतीति स्वेदोदकस्य कुसुमरोधकत्वं स्फुटम् ।

अत्र दुष्यन्तस्य नायिका शकुन्तला आलम्बनविभावः, वननायिकासौन्दर्यदर्शन-सखीवचनानि उद्दीपनविभावाः, अभिलाषानन्दगुणकथनसौहित्यवचनानि अनु-भावाः, हर्षोत्साहमतिधृतिशङ्कादयो व्यभिचारिभावाः, एतैः विभावादिभिः उद्बुद्धः रतिस्थायिभावः सामाजिके शृङ्गाररसताम् एति । रतेः दुष्यन्तशकुन्तलयोः नायकनायिकयोः उभयनिष्ठत्वात् सम्भोगशृङ्गारः अयम् ।
एवञ्च-

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥

गौतम्यागमनेन विहिनतमनोरथायाः शकुन्तलायाः ताभिः सह प्रस्थाने कृते तमेव शकुन्तलापरिभुक्तमुक्तं लतामण्डपमुपेत्य दीर्घं निःश्वस्य राजा दुष्यन्तः ब्रवीति पक्ष्मलाक्ष्याः अङ्गुल्या संवृतमधरोष्ठं मा मा नहि नहि अलमि- त्यादिनां प्रतिषेधाक्षराणां स्फुटमनुच्चारणेन सुन्दरं मुहुर्मुहुः स्कन्धपरावर्तन- शीलं मुखं मया (दुष्यन्तेन) अतिकृच्छ्रेण चुम्बनार्थमुन्नमितं न तु यथेच्छं चुम्बितम् । गौतम्या आगमनात् अधरास्वादो न लब्धः ।

अत्र नायकस्य दुष्यन्तस्य शकुन्तला आलम्बनविभावः, लतामण्डप-नदीतीरवातावरण सुरतानुकूलैकान्तनायिकोपस्थितिनिर्गमनानि उद्दीपनविभावाः, सम्प्रलापोच्छा वासनिः श्वासस्वेदरोमाञ्चाः अनुभावाः, हर्षोत्साहावेगोन्माद-विषादाः सञ्चारिभावाः, एतेषां विभावादीनां संयोगात् रतिस्थायिभावः सामा-जिके शृङ्गाररसतामाप्नोत् । अत्र सम्भोगशृङ्गारः । नायिकायाः क्षणात् पूर्वपरि-भुक्तिः, सद्यो निर्गमनं नायके तस्याः गाढानुरागः विघ्नरहिते इतोऽपि परिभोगा-सक्तिः च प्रकरणवशात् प्रतीयन्ते तथा च नायिकानिष्ठनायकरतेः विच्छित्यभावः मानसिकसंयोगश्च वर्तते इति कृत्वा अत्र सम्भोगशृङ्गारः ।

अभिज्ञानशाकुन्तले नाटके शान्तरसोऽपि वर्तते । सप्तमाङ्के कश्यपा-श्रमः तद्विषयो विद्यते । अत्र केचन श्लोकाः शान्तरससम्बद्धाः शान्तरससर-तद्धनिर्वेदादिभावयुक्ताः सन्ति । दुष्यन्तः मातलिना सह हेमकूटस्थं कश्यपा-श्रममवतरति आकाशमार्गेण तदा कश्यपस्य तपः तदाश्रमपरिसरं च बहुधा प्रशंसते । तत्कालिकः श्लोकोऽयम्-



प्राणानामतिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे घर्माभिषेकाक्रिया ।
ध्यानं रत्नशिलातलेषु विबुधस्रोसंनिधौ संयमा
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥

महर्षेः कश्यपस्याश्रमावलोकेन सर्वतो विस्मयमनुभवन् राजा दुष्यन्तो मातलिं वदति- सत्कल्पवृक्षे वने तपश्चरणयोग्या जीवधारणं भवति वायुना । काञ्चनपद्मानां परागैः पिङ्गलवर्णे तोपे घर्माय अभिषेकस्य विधिः भवति । रत्नानां शिलातलेषु ध्यानं भवति । अप्सरसां सन्निधौ इन्द्रियनिग्रह अभ्यस्यते । अन्ये मुनयः कृच्छ्रैः तपोभिः यद् यद् वस्तु स्वर्गादिकं वा इच्छन्ति तादृशो अपि वस्तु मध्ये अस्य आश्रमस्य मुनयः तपस्यन्ति अन्यमुनिभिः कश्यपाश्रमः तस्य मुनयश्च भिन्नाः दृश्यन्ते स्वविशिष्टगुणैश्च इति श्लोकस्य तात्पर्यम् ।

अत्र दुष्यन्तस्य वचनस्य आलम्बनविभावः कश्यपाश्रमः विशिष्ट-तपोगुणमुनयः आश्रमवातावरणम् उद्दीपनविभावः, रोमाञ्चहर्षप्रसन्नताः अनु-भावाः, हर्षविस्मयोत्साहादयः व्यभिचारिभावाः, एतेषां विभावादीनां संयोगात् शमस्थायीभावः सामाजिकानां सामाजिकेषु साधारणीकरणमाप्त्वा शान्तरसतां भजते ।

अत्र कश्यपाश्रम आलम्बनविभाव इति उक्तः समग्राश्रमवर्णनात् । आश्रमवातावरणपावित्र्य विशिष्टाय कारणं कश्यपप्रभावः । शान्तरसस्य स्थायि-भावः शमः । अतिधवलवर्णः श्रीमन्नारायणः देवता च । शमस्थायीभावस्य आधारः उत्तमप्रकृतिः स्यात् । वैराग्यं परमात्मवस्तुनियत्वं यत्र यत्र शान्त-रसोऽयमास्वाद्यते ।

अभिज्ञानशाकुन्तले महोन्नतनाटके विविधरसभावाः सन्ति चेदपि समग्रप्रबन्धात्मकदृष्ट्या विचारयामः चेत् अत्र प्रधानरसः शृङ्गारः । कारणं तस्य उपरि विवृतम् । तं सम्भोगं विप्रलम्भः परिपोषयति । अङ्गरसाः विविधभावाः च आस्वाद्यन्ते । विविधरसभावानां सन्ततप्रवाहेन नाटकमेकम् आस्वाद्यते खलु । प्रकृते शाकुन्तले रूपके उक्तसर्वांशकारणात् एतत् प्रसिद्धनाटकमिति सर्वैः पण्डितपामरैः परिगण्यन्ते । एवञ्च अस्मिन् नाटके अनेके रसाः अङ्गभूताः सन्तः श्रृङ्गारं परिपोषयन्ति ।

## EDITORIAL ADVISORY BOARD

**Chief Editor : Dr. Gopalkrishna Hegde,**
**Jyotisha Shastra & Dharma Shastra Vidwan**
**Hegde, Kumta, Uttara Kannada**
**Karnataka – 581330, Ph. : 9741847399**

## BOARD OF EXPERTS AND REFEREES

1. **Dr. Viroopaksha V. Jaddipal**
   **Secretary,**
   **Maharshi Sandipani Rashtriya Vedavidya Pratishthan,**
   **Vedavidya Marg, Chintaman Ganesh,**
   **P.O.: Jawasiya-456006, Ujjain, M. P.**
   **Ph. : 9440002813**
2. **Dr. N. Laxminarayana Bhatta**
   **Principal, SMSP Samskritha College,**
   **UDUPI-576101, Karnataka,**
   **Ph : 9481750414**
3. **Prof. Ramachandra N. Bhat**
   **Principal, Samskrita College, Ummachagi- 581347**
   **Yallapura, Uttara Kannada, Karnataka**
   **Ph. : 9480019152**
4. **Dr. Shankar Nagesha Bhat, Baligadde**
   **Prof. Dept. of Advaita Vedanta Shastra,**
   **Samskrita College, Swarnavalli Matha, Mathadevala-581336**
   **Sirsi, Uttara kannada, Karnataka**
   **Ph. : 9480954301**
5. **Dr. Venkataramana Hegde**
   **HOD, Dharma Shastra,**
   **Govt, Maharaja Samskrita College, Mysore- 570024, Karnataka**
   **Ph. : 9480476144**
6. **Dr. Nagapati Bhat. Emmegundi**
   **Principal, SRBS Sanskritha Snathaka-Snathakottara Adhyayana Kendram, Subrahmanya, Surkatte-581334, Honnavara, Karnataka**
   **Ph : 9481871482**
7. **Dr. U. G. Shastri**
   **Rtd. Principal, A V Baliga College of Arts & Science,**
   **Pancharabena, Hegde -581330, Kumta, Uttara Kannada, Karnataka**
   **Ph. : 08386-260391, 9449992160**

## ಸಹೃದಯ ಲೇಖನಪ್ರದಾತೃಗಳಲ್ಲಿ ಸವಿನಯ ವಿನಂತಿ.

ನಮ್ಮ ಈ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯ ಹೆಸರು ಯು.ಜಿ.ಸಿ. ಯ ಪ್ರಕಟಿತ ಜರ್ನಲ್ ಲೀಷ್ಟಿನಲ್ಲಿ ಇಲ್ಲಿಯ ವರೆಗೆ ಸೇರ್ಪಡೆ ಆಗಿಲ್ಲ. ನಮ್ಮ ಹಂತದಲ್ಲಿ ಆ ಬಗ್ಗೆ ಪ್ರಯತ್ನ ಜಾರಿಯಲ್ಲಿದೆ. ದಿಲ್ಲಿಯ ರಾಷ್ಟ್ರಿಯ ಸಂಸ್ಕೃತ ಸಂಸ್ಥಾನದವರು ನಮ್ಮ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯ ಹೆಸರನ್ನು ಶಿಫಾರಸ್ಸು (ರೆಕಮಂಡ್) ಮಾಡಿ ಯು.ಜಿ.ಸಿ. ಗೆ ಈಗಾಗಲೇ ರವಾನಿಸಿರುತ್ತಾರೆ.

ಇಲ್ಲಿಯ ವರೆಗೂ ಯಾವ ವಿಶ್ವವಿದ್ಯಾಲಯದವರೂ ನಮ್ಮ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯಲ್ಲಿ ಪ್ರಕಟವಾದ ಲೇಖನವನ್ನು ತಿರಸ್ಕರಿಸಿಲ್ಲ. ನಮ್ಮ ಪತ್ರಿಕೆಯಲ್ಲಿ ಪ್ರಕಟವಾದ ಪ್ರಮಾಣಪತ್ರವನ್ನು ಆಧಾರವಾಗಿಟ್ಟುಕೊಂಡೇ ಅವರ ಪ್ರಬಂಧವು (ಥಿಸೀಸ್) ವಿಶ್ವವಿದ್ಯಾಲಯದ ಮಾನ್ಯತೆಯನ್ನು ಪಡೆದಿದೆ ಎನ್ನುವುದು ಇಲ್ಲಿ ಗಮನಾರ್ಹವಾದ ಅಂಶವಾಗಿದೆ.

ಬೆಂಗಳೂರಿನ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ಯುನಿವರ್ಸಿಟಿ, ಧಾರವಾಡದ ಕರ್ನಾಟಕ ಯುನಿವರ್ಸಿಟಿ, ತಿರುಪತಿಯ ರಾಷ್ಟ್ರಿಯ ಸಂಸ್ಕೃತ ವಿದ್ಯಾಪೀಠ, ದಿಲ್ಲಿಯ ರಾಷ್ಟ್ರಿಯ ಸಂಸ್ಕೃತ ಸಂಸ್ಥಾನ ಇವೆಲ್ಲವೂ ನಮ್ಮ ಪತ್ರಿಕೆಯಲ್ಲಿ ಪ್ರಕಟವಾದ ಲೇಖನವನ್ನು ಪುರಸ್ಕರಿಸಿವೆ. ಈ ಎಲ್ಲಾ ಯುನಿವರ್ಸಿಟಿಗಳಿಗೂ ಹೃತ್ಪೂರ್ವಕ ಧನ್ಯವಾದವನ್ನು ಈ ಮೂಲಕ ಸಲ್ಲಿಸುತ್ತೇವೆ.

ಇದನ್ನು ಯಾಕೆ ಉಲ್ಲೇಖಿಸುತ್ತಿದ್ದೇನೆಂದರೆ "ನಿಮ್ಮ ಪತ್ರಿಕೆಯ ಹೆಸರು ಯು.ಜಿ.ಸಿ. ಲೀಷ್ಟನಲ್ಲಿ ಇಲ್ಲವಲ್ಲ" ಎಂಬುದಾಗಿ ಎಷ್ಟೋ ಲೇಖನ ಪ್ರದಾತೃಗಳು ದೂರಾವಾಣೀ ಕರೆಗಳನ್ನು ಮಾಡಿ ಈ ಬಗ್ಗೆ ವಿಚಾರಿಸಿದ್ದು ಉಂಟು.

ನಿಮ್ಮೆಲ್ಲರ ಹಾರೈಕೆಗಳಿಂದ ಆದಷ್ಟು ಶೀಘ್ರದಲ್ಲಿ ನಮ್ಮ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯ ಹೆಸರು ಯು.ಜಿ.ಸಿ. ಪ್ರಕಟಿತ ಲೀಷ್ಟಿನಲ್ಲಿ ಸೇರ್ಪಡೆ ಆಗುವಂತಾಗಲಿ. ಈ ಬಗ್ಗೆ ತೀವ್ರವಾದ ಪ್ರಯತ್ನ ಮಾಡುತ್ತಾ ಇದ್ದೇವೆ,

ವಂದನೆಗಳೊಂದಿಗೆ,

ಡಾ. ಗೋಪಾಲಕೃಷ್ಣ ಹೆಗಡೆ

ನಿರ್ದೇಶಕಃ